॥ ओ३म् ॥
रोहते सायकैर्विद्धं वनं परशुना हतम्।
वाचा दुरुक्तं वीभत्सं
न संरोहति वाक्क्षतम्॥
(महाभारत, उद्योग पर्व - ३४/७८)

अभ्यावहति कल्याणं विविधं
वाक् सुभाषिता।
सैव दुर्भाषिता राजन्
अनर्थायोपपद्यते॥
(महाभारत, उद्योग पर्व - ३४/७७)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23

Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत - संवाद:

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट: www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
विषयाणामानुकूल्ये सुखी
दु:खी विपर्यये।
सुखं दु:खं च तद्धर्म:
सदानन्दस्य नात्मन: ॥107॥
-विवेकचूड़ामणि:

दुर्लभा: पुरुषा लोके भगवद्भक्तिमानसा:
तेषां संगो भवेद्यस्य तस्य
शान्तिर्हि शाश्वती!!
-नारदपुराणम् 4/38

卐 वर्षम्-१३ 卐 अंक:-०९ (२९७) नवदेहली 卐 १ नवम्बरमास: २०२३त: १५ नवम्बरमास: २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## संस्कृति: परम्पराभि: सह प्रगते: परिचयस्य च भाषा संस्कृतम्-प्रधानमन्त्री नरेन्द्रमोदी

चित्रकूट:। प्रधानमंत्री नरेन्द्रमोदी चित्रकूटस्य तुलसीपीठसेवान्यासस्य एकस्मिन् कार्यक्रमे उक्तवान् यत् संस्कृतं केवल परंपराणां न अपितु अस्माकीन प्रगते: परिचयस्य च भाषा। परतंत्रताया: 1000 वर्षीये



कालखंडे भारतीय संस्कृतिं परंपराश्च नाशयितुं महान् प्रयत्न: कृत:। यत्फलेन संस्कृत भाषां प्रति नकारात्मक प्रयासा: विहिता:। परंतु अधुना स्वतंत्रताया: अमृत कालस्य अन्तर्गत नववर्षेषु संस्कृत संस्कृति संवर्धनाय कार्यं क्रियतेस प्रधानमंत्री अवसरेस्मिन् जगतगुरु स्वामिना रामभद्राचार्येण लिखितानां त्रयाणां पुस्तकानाम् 'अष्टाध्यायी भाष्यं', 'रामानंदचार्य चरितं', 'भगवान श्रीकृष्ण की राष्ट्रलीला' इत्येषां विमोचनमपि अकरोत् । जगतगुरु रामभद्राचार्य: प्रधानमंत्रिणं निवेदितवान् यत् श्री रामचरितमानसं राष्ट्रिय ग्रंथ: घोषित: भवेत्। प्रधानमंत्री अयोध्यायां निर्माणाधीन श्री राममंदिर निर्माणे स्वामिन: रामभद्राचार्यस्य तथ्यात्मक योगदानमपि उल्लिखितवान्। अवसरेस्मिन् मध्य प्रदेशस्य मुख्यमंत्री श्री शिवराजसिंहचौहान एवं च राज्यपाल: अपि उपस्थितौ। सभाया: कुशल संचालनं पाणिनिसंस्कृतविश्वविद्यालय, उज्जैनस्य रीवा परिसरीय: निदेशक: प्रो तुलसीदासपरोहा कृतवान् स प्रधानमंत्री चित्रकूटस्य रघुवीर मंदिरे पूजामपि कृतवान्। तत्पश्चात रणछोड़ दासमंदिरे कांचमंदिरे च दर्शनं कृतवान्। तेन श्रीरामसंस्कृतमहाविद्यालये विद्यार्थिनां वेद पाठोऽपि श्रुत: । अवसरेस्मिन् प्रधानमंत्रिद्वारा जगतगुरु स्वामिना रामभद्राचार्येण लिखिताया: पाणिनि अष्टाध्याय्या: विमोचन क्षणानि अबिस्मरणीयानि प्रतिपाद्य केंद्रीय संस्कृत विश्वविद्यालय नई दिल्ल्या: कुलपति: प्रो श्रीनिवासबरखेडी कथितवान् यत् भगवान् पाणिनि: 3000 वर्षेभ्य: पूर्वमपि विश्वस्मै संगणक रूपरेखां प्रदत्तवान्।

## भारतीय-ज्ञान-परम्पराणां संवाहकता केंद्रीयसंस्कृत विश्वविद्यालयस्य गौरवम् - प्रो. श्रीनिवासवरखेड़ी

नवदेहली। केंद्रीय संस्कृत विश्वविद्यालयस्य गौरवं यत् भारतीय ज्ञान परम्पराणां संवाहकतया सुदृढा भविष्यति । एष: विचार: नवदिल्ली स्थिते केंद्रीयसंस्कृतविश्वविद्यालयस्य सारस्वत सभागारे कुलपति: प्रो श्रीनिवास बरखेडी व्यक्तीकृतवान् स तेन कथितं यत् स्वविश्वविद्यालयस्य स्थापना दिवसं समाचरणस्य महत्त्वं स्वसंस्थां प्रति सम्मानतया सह तदुद्देश्यानां सफलताम् आनीय आत्म निरीक्षणं करणीयम् ।



अथ च केन्द्रीय संस्कृत विश्वविद्यालय: यस्य पूर्वतनं नाम राष्ट्रिय संस्कृत संस्थानम् आसीत्। तत् स्थापना 15 अक्टूबर 1970 तमे दिनाङ्के अभवत् । विश्वविद्यालयस्य स्वीया एका वृहती यात्रा सुनिश्चित्य विश्वस्य एकमात्रं बहुपरिसरीय: देशे विदेशे च संस्कृतस्य प्रचाराय प्रसाराय च भारत सर्वकारस्य नोडल निकाय रुपेण कार्यरत: अस्ति। एता: उपलब्धी: दृष्ट्वा संसद: अधिनियमस्य 2020 अन्तर्गत: अयं केन्द्रीय संस्कृत विश्वविद्यालय रुपेण घोषित: । प्रो बरखेडी हर्ष व्यक्तीकुर्वन् कथितवान् यत् दिल्ली विश्वविद्यालय:,जवाहरलालनेहरूविश्वविद्यालय:, वाराणसी हिन्दूविश्वविद्यालय: इव ग्रेड A++ प्रदाय सम्मानित: । सारस्वत अतिथि रुपेण डा भाग्येश झा,पूर्व आईएएस अधिकारी येन गुजरात सर्वकारे स्व महत्त्वपूर्ण भूमिकां निव्यूढवान् उक्तवान् च भारतं वर्तमाने सांस्कृतिक पुनर्जागरणस्य काल खण्डे अस्ति यत्र संस्कृतस्य महत्त्वपूर्ण भूमिका भविष्यति । तेनोक्तं यत् संस्कृतं पूर्णे विश्वस्मिन् आलोकितां कर्तुं शक्नोति जीवन प्रबन्धनेऽपि संस्कृतस्य योगदानम् अत्यंतं महत्त्वपूर्णम् । अस्मिन् कार्यक्रमे प्रो सुकान्त कुमार सेनापति: , कुलपति:, श्री सोमनाथ संस्कृत विश्वविद्यालय वेरावल, गुजरातम् , आचार्य विरुपाक्ष वि. जड्डीपाल:, सचिव:, महर्षिसान्दीपिनीराष्ट्रियवेदविद्याप्रतिष्ठानम् , उज्जैनम्, तथा च श्री रामप्रसादपौल:, त्रिपुरा

शेषभाग:तृतीयेपुटे

## कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयेन भारतीय-ज्ञान-परम्पराम् आधृत्य अन्ताराष्ट्रियसम्मेलनम् आयोजितम्

-डॉ. अमितभार्गव:

रामटेक। विश्वविद्यालये भारतीयज्ञानपरम्पराम् (आईकेएस) अवलंब्य एकदिवसीये अंताराष्ट्रिय सम्मेलनं कुलपते: हरेरामत्रिपाठिनो नेतृत्वे मार्गदर्शने आध्यक्ष्ये च सम्पन्नम् तत्र उद्घाटनं प्रसिद्ध संस्कृत विद्वान प्रो रमेशभारद्वाज:, कुलपति:, महर्षिवाल्मिकीसंस्कृतविश्वविद्यालय, कैथल, हरियाणा इत्यनेन



कृतम्प्रारम्भ: जातवेदसी यज्ञशालायाम् अतिथिभि: विष्णुयागस्य पूर्णाहुत्या कृत:। नेपालसंस्कृतविश्वविद्यालयत: विशिष्टातिथि: प्रो. माधवअधिकारी, और सम्मानितातिथि: डॉ. रघुनाथनेपाल:, डॉ. शिवप्रसादन्यूपाने, प्रो रंभाकुमारीआर्यल:, सम्मेलनायोजक: प्रो कृष्णकुमारपांडे, संयोजक: प्रो. मधुसूदनपेन्ना, कुलपति: भारतीय धर्म, दर्शन और संस्कृति संकाय: इत्येते मंचे उपस्थिता:। प्रो. मदुसूदनपेन्ना प्रस्तावनायां कथितवान् "आईकेएस ज्ञानं, विज्ञानं मानव जीवनम् इत्येतै: संबंद्धम्। युवसंतत्या संस्कृते: महिमा:, ज्ञानस्य प्राचीन परंपरा, तद्विज्ञानं इत्येतत्सर्वं ज्ञातव्यम् । माननीय कुलपतिना प्रो. त्रिपाठिना अतिथिभ्यो वेदांग ज्योतिष विभाग द्वारा आईकेएसपरियोजनान्तर्गतं निर्मितानि शॉल, पुस्तक, स्मृति चिन्ह, भारतीय दिनदर्शिका

शेषभाग: तृतीयेपुटे

## भारतीय-संस्कृते: समावेशेन भविष्यति सततविकास:-प्रो० महावीरअग्रवाल:

हरिद्वारम्। पतंजलिविश्वविद्यालयस्य 'सी. फॉर यू.इनोवेशन' इत्यस्य संयुक्ततत्वावधाने पतंजलि विश्वविद्यालयस्य सभागारे एक दिवसीय सम्मेलनस्य आयोजनं टेड-एक्स के सौजन्येन अभवत्। सम्मेलने



ज्ञान-विज्ञान-अनुसंधानं, तकनीक, चिकित्सा, साहित्यं पर्यावरणं च इत्येभ्य: संबद्धविशेषज्ञा: स्व विचारान् उपस्थापितवन्त:। 'इमां धरां श्रेष्ठस्थाने कथं निर्मामः' इतिविषयम् आधृत्य आयोजिते अस्मिन् सम्मेलने पर्यावरण संतुलने,वन संरक्षणे कार्बन उत्सर्जने च न्यूनतां कथम् आनयेम इत्येषु विषयेषु विद्वांस: स्व महत्वपूर्णान् वैज्ञानिक विचारान् व्यक्तीकृतवन्त: । कार्यक्रमस्य शुभारम्भ: वैदिक मन्त्रै: सह दीप प्रज्ज्वलन माध्यमेन पतंजलिविश्वविद्यालयस्य यशस्विन: प्रति-कुलपते: प्रो.महावीरअग्रवालस्य जी, वि.वि. विभिन्न संकायाध्यक्षाणां कुलसचिवानां च द्वारा विहित:। आगंतुक अतिथीनां वक्तघ्णां च स्वागतम्, अभिनंदनं च भारत स्वाभिमान समिते: मुख्य केन्द्रीय प्रभारी स्वामीपरमार्थदेव: कृतवान्। तेन स्वच्छायै

शेषभाग: तृतीयेपुटे

# संस्कृतसाहित्ये बहु प्रचलितं विख्यातञ्च छन्दोऽस्ति वंशस्थम् - गोपालकृष्णमिश्रः

(वार्ताहरी - आस्थाशुक्ला, कर्णपुरम्)



संस्कृतच्छन्दसः कार्याशालायाम् संस्कृत विदुषः आभासिकजगतः विचक्षणः, महात्मागाँधीकेंद्रीय विश्वविद्यालय-बिहारस्य शोधच्छात्रः एवम् उत्तर-प्रदेश-संस्कृत-संस्थानं-लखनऊ इत्यस्य वरिष्ठः प्रशिक्षकः श्रीमान् गोपालकृष्णमिश्रवर्यः मुख्य-व्याख्यातासीत्। दिवसेऽस्मिन् महोदयेन वंशस्थछन्दः पाठितम्। महोदयः अस्य छन्दसः विषये सम्यक् प्रकारेण छात्रान् अवगमनं कारितवान्। नव दिनाङ्कतः आयोज्यमानायामस्यां कार्याशालायां नित्यम् एकं संस्कृतच्छन्दः पाठ्यते। एषा कार्यशाला सर्वासु प्रतियोगिपरीक्षासु कृते बहु उपयोगी अस्ति यतोहि परीक्षायाम् अपि छन्दसः विशेषो भूमिका भवति । संयोजकेन श्रीगोपालमिश्रवर्येण बहूत्तमा कार्यशाला आयोज्यमानास्ति । कर्णपुरतः आस्था शुक्ला महोदयया सञ्चालनं स्वागतभाषणञ्च कृतम् । महोदयः उक्तवान् यत् संस्कृतसमुपासकेभ्यः इयं कार्यशाला बहु लाभप्रदा भविष्यति इति विश्वासोऽस्ति। चतुर्दशेदिवसे 'वंशस्थछन्दसि' पठित्वा महती प्रसन्नता अभवत्। श्रीमान् मुख्य-व्याख्याता महोदयः सम्यक् रूपेण एतत् छन्दः उदाहरणसहितम् सर्वान् पाठितवान् । तदनन्तरं सर्वे सम्यकप्रकारेण उदाहरणमाध्यमेन अभ्यासं कृतवन्तः। अस्यां कार्यशालायां संस्कृतच्छात्राणां रुचिः तु अस्ति एव अन्ये संस्कृत प्रेमिणोपि पश्यन्ति प्रतिभागं च कुर्वन्ति । कार्यक्रमस्य अन्तिमे उपासना महोदयया शान्तिमन्त्रः कृतः। अस्मिन् सत्रे ऑनलाईन गूगलमीटमाध्यमेन यूट्यूबमाध्यमेन च त्रिंशताधिकाः प्रतिभागिच्छात्राः उपस्थिताः आसन् ।

## कार्यशालायाः एकादशसत्रे डा० सूर्यकान्तत्रिपाठीवर्येण मालिनी इति छन्दसः महत्ता प्रतिपादिता

(वार्ताहरी - नीलाक्षी श्रीवास्तवा, बहराइचतः)

ध्यातव्यम् अस्ति यत् नवदिनाञ्कतः आभाषीय माध्यमेन संचाल्यमानः संस्कृतछन्दसः कार्यशालायाः आयोजनम् मम संस्कृतम् my sanskritam नाम्नः यूनलिका, गूगलमीट मध्ये च निःशुल्केन भवति। इयं कार्यशाला अक्तूबर 9 दिनांकतः 31 अक्तूबर पर्यन्तं भविष्यति ।

इयं कार्यशाला विंशतदिवसात्मिका भविष्यति। यस्मिन् प्रतिदिनं संस्कृतजगतः प्रसिद्धः कोपि एकः विद्वान् आगत्य छन्दसाम् उपरि स्वस्य व्याख्यानं दत्वा तस्य महत्तां प्रतिपादयति। अस्मिन् एव क्रमे द्वाविंशतितमे दिनाङ्के एकादशसत्रे मालिनी इति विषये सर्वम् प्रतिपादयितुं मुख्यव्याख्याता रूपेण डॉ. सूर्यकान्तत्रिपाठी, सुविख्यातः कविः तथा सहायकाचार्यः, संस्कृतविभागः, दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयतः अस्माकं मध्ये समागतवान्, यस्य उपाधिः महाकविकालिदासादिषु समम् आधुनिककविरूपेण वर्तते। अस्य महोदयस्य उपाख्यानं श्रुत्वा सर्वेऽपि मुदिताः अभवन् । यतोहि येन प्रकारेण् महोदयेन मालिन्यः लक्षणं उक्त्वा सुष्ठुतया सरलतया च तस्य लयमात्रादिकं बोधितं तथा च एतस्य गायनं कृतवान् तत् सर्वं प्रशंसनीयम् । कार्यक्रमस्य सञ्चालनम् संस्कृताऽमृतम्, मम संस्कृतम् इत्यनयोः संस्थापकाध्यक्षो डा. गोपालकृष्णमिश्रवर्येण कृतम् एवञ्च कार्यक्रमस्य प्रास्तविकं इतिवृत्तं स्वागतभाषणञ्च मिश्रवर्येणैव कृतम्। ततः परम् अतिथेः व्याख्यानं अभवत्। तदुपरान्त सुरेशध्यानीवर्येण शान्तिमन्त्रेण कार्यक्रमः सम्पन्नः जातः । आभासीयमाध्यमेन आयोजिते कार्यक्रमे अस्मिन् सुविख्यातः कविः श्रीमान् अरविन्दतिवारीवर्येण सहितं त्रिंशताधिक जनाः ऑनलाइनऑफलाइन माध्यमेन च लाभान्विताः आसन्।

---

# भारतीयवेदसम्मेलनम्

(वत्स-देशराज-शर्मा)

स्वामिनारायणगुरुकुलविश्वविद्याप्रतिष्ठानस्य छाड़ोरी अहमदाबादस्य तथा



सान्दीपनीराष्ट्रियवेदविद्याप्रतिष्ठानस्य संयुक्तोपक्रमेखिलभारतीयवेदसंमेलनं २०,१०,2023-23, १०,2023 खैस्ताब्दं यावत् संजातम। तत्र स्वामिश्रीमाधवप्रियदासमहोदयानां संनिधाने तथा गुर्जर प्रान्तस्य महामहिमराज्यपालश्रीदेवव्रतशर्ममहोदयानां मुख्यातिथ्य उद्घाटनमभूत्। तत्र प्रो.कमलाकान्तत्रिपाठिनःरामप्रिय पाण्डेयास्तथा प्रतिष्ठानस्य सचिवा विरूपाक्षमहोदयास्तथा प्रोफेसररामनाथझामहोदया आसन्। दशशाखापारायणमपि भवति स्म। तस्मिन् संमेलने श्रौतसूत्रपारदृश्वनामुपस्थितिर्हदयावर्जकतया समभूत्। समेषां विदुषां स्वामिवर्यश्रीमाधवप्रियदासमहोदयैरकारि। समे तत्र दिव्यतामन्वभूवन्। तत्र जेतलपुरश्रीस्वामिनारायणपाठशालाया आचार्यास्तथा अनिरुद्धचौबेमहोदया डॉ. अभिषेकोपाध्यायःश्रीविपिनभाई एवमन्ये वैदिकविपश्चितःस्वस्वव्याख्यानैर्गोष्ठीगौरवं व्यवर्धयन्। श्रीरामानुजन्महोदया वेदविषये विशिष्टं निजकार्यं प्रादर्शयन्।

# कविकुलगुरु-कालिदास-संस्कृत विश्वविद्यालये सांस्कृतिकयुवमहोत्सवः

- सचिनद्विवेदी

संस्कृतमातुः सेवायै शास्त्ररक्षणाय च कृतसंकल्पेन महाराष्ट्रराज्यस्य नागपुरनगरस्थितेन कविकुलगुरु-कालिदास-संस्कृत विश्वविद्यालयेन छात्राणां निरन्तरविकासाय तेषु च विद्यमानप्रतिभान्वेषणाय नैके कार्यक्रमाः आयोज्यन्ते । तेषु च कार्यक्रमेषु छात्राणाम् उत्साहवृद्धये छात्र कल्याण विभागद्वारा इन्द्रधनुष्यनिवडफेरी इति



नामकः सांस्कृतिकयुवामहोत्सवः आक्टोबर मासस्य विंशतिदिनाङ्के (२०-१०- २०२३) समायोजि । अत्र च सप्तमुख्यस्पार्धान्तर्गततया उपत्रिंशत् स्पर्धाः आजोजिताः । न केवलं शरीरसंरक्षणी भूतक्रीडास्पर्धा अपि तु तेन भारतीयसंस्कृतिसंरक्षणाद्भूताः महाराष्ट्रराज्यीयलोककलास्पर्धाः अपि समायोजिषत । अस्य उद्घाटनकार्यक्रमे विश्वविद्यालयस्य सह सम्मान्याः कुलपतयः प्रो हरेरामत्रिपाठी महाभागाः याजमान्यमावहन्। अस्मिन् कार्यक्रमे अधिमञ्चं मुख्यातिथित्वेन कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य पूर्वसंकायाध्यक्षाः प्रो. नन्दापुरी उपास्थात। विशिष्टातिथित्वेन च, विश्वविद्यालयस्य कुलसचिवाः प्रो. कृष्णकुमार पाण्डेयमहाभागाः, परिसरसञ्चालकाः, कार्यक्रमसंयोजकाः च आसन् । कार्यक्रमेस्मिन् विश्वविद्यालयस्य सम्मान्याः कुलपतयः प्रो हरेरामत्रिपाठी महाभागाः स्वीय आध्यक्षीय भाषणे भूयमानानां स्पर्धानां महत्वं प्रत्यपादयन् तथा च एशियन गेम्स प्रतियोगितायां जितानां क्रीडास्पर्धूनां कृते अभिनन्दनानि वदन्तः तेषां प्रेरणादायि जीवनसंघर्षं अभ्यनन्दन् । क्रीडादिस्पर्धाभिः छात्राणां शरीरविकासः, मनोविकासश्च भवति। विकसितशरीरो हि शास्त्रं परिपोषयन् राष्ट्रस्य संस्कृतिसंरक्षणपरः भवितुमर्हति इत्यतः नित्यं सर्वैः क्रीडासु भागः ग्रहीतव्यः। तदर्थं च अपेक्षिताः सर्वाः अपि व्ययसाध्याः व्यवस्थाः विश्वविद्यालयेन करिष्यन्ते इत्यपि प्रतिज्ञातम् । सरस्वतातिथयः, मुख्यातिथयश्च स्ववाग्विन्यासैः छात्रान् अनूनुदन्। ये तावत् स्पर्धायां भागजिघृक्षवो वर्तन्ते ते सर्वेपि प्रवेशमात्रेण जिताः मनसः दृढीकरत्वादेव इत्येवं अनेकानि स्फूर्तिजनकानि वचांसि सरस्वतातिथिभिः, मुख्यातिथिभिश्च व्यापारीकृतानि। अस्यां स्पर्धायां विश्वविद्यालयसंबद्धाः ये ये विद्यालयाः तत्सम्बन्धिनः छात्राः भागमगृण्हन्। विश्वविद्यालयस्य तद्दिनीयवातावरणं स्फूर्तिप्रदायकमजायत । अन्ते स्पर्धासु जितच्छात्रेभ्यः पुरस्कारवितरणेन, ज्येष्टेभ्यः धन्यवाद ज्ञापनेन कार्यक्रमः समाप्तिमियाय।

---

# मऊ जनपदे अनौपचारिक संस्कृत केन्द्रस्योद्घाटनमभवत्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य विशिष्टा इयं योजना अनौपचारिकसंस्कृतशिक्षण योजना। अद्य अक्टूबर-मासस्य एकोनविंशति दिनाङ्के सन्त गणिनाथ राजकीय स्नातकोत्तर महाविद्यालये केन्द्रस्य





उद्घाटनम् अभवत्। अस्मिन् अवसरे महाविद्यालयस्य प्राचार्या महोदया अवदत् यत् संस्कृते एव अस्माकं प्राचीनं ज्ञानं निहितमस्ति। संस्कृतेन विना अस्माकं ज्ञानम् अपूर्णम् अस्ति अतः ज्ञानाय संस्कृतं पठन्तु। मुख्यातिथिः डॉ अवनीन्द्रकुमार पाण्डेय महोदयः छात्रान् संस्कृतग्रामं प्रति उद्बोधितवान्। सहायकाचार्यो डॉ राकेश महोदयोपि संस्कृतं प्रति प्रेरितवान्। सञ्चालनम् अकरोत् केन्द्राधिकारिमहोदयः डॉ चन्द्रकान्तदत्तशुक्लः। धन्यवादज्ञापनं कृतवती केन्द्र शिक्षिका डॉ नेहा मिश्रा। मंङ्गलाचरणेन वातावरणं मङ्गलं कृतवती महाविद्यालयस्य छात्रा प्रिया। स्वागतगीतं कृतवत्यः आंचल, महक, आकाङ्क्षा, मधुरिमा च। कार्यक्रमे महाविद्यालयस्य सर्वे शिक्षकाः, छात्राः अपि आसन्। सर्वेभ्यो धन्यवादाःपाठयेम संस्कृतं जगति सर्वमानवान्। प्रापयेम भारतं सपदि परं वैभवम्।

# सृष्टेः मूलकारणविमर्शिनी राष्ट्रिया सङ्गोष्ठी सुसम्पन्ना

-डॉ. लक्ष्मीकान्तविमलः, नव देहली

नवदेहल्यां स्थितेन श्रीशंकरशिक्षयतन-वैदिकशोधसंस्थानेन अक्टूबरमासस्य एकत्रिंशत्तमे दिनांके अन्तर्जालीयमाध्यमेन एका राष्ट्रिया संगोष्ठी समायोजिता। पण्डितमधुसूदनओझामहोदयानां ब्रह्मविज्ञानग्रन्थविभागशृङ्खलायां शारीरकविमर्शः नामकः ग्रन्थः समायाति। अस्य ग्रन्थस्य चतुर्दशं प्रकरणम् अधिकृत्य सर्वे अतिथिविद्वांसः



विषयस्य उपस्थापनं कृतवन्तः। शारीरकविमर्शस्य चतुर्दशे प्रकरणे सृष्टेः मूलकारणतत्त्वं किमस्ति इतिविषये विचारः दृश्यते। चार्वाकदर्शने सृष्टेः मूलं लोकमस्ति। अत्र लोकपदेन आकाशः वायुः पृथ्वी तेजः गृह्यते। शैवदार्शनिकाः सृष्टेः मूलं शिवं स्वीकुर्वन्ति। भागवतशाखीनः भक्ताः प्रकृतिसहितं विष्णुं सृष्टेः मूलं कारणं स्वीकुर्वन्ति। वैशेषिकदर्शने सृष्टेः मूलकारणम् प्रजापतिस्वरूपम् आत्मानं स्वीकृतमस्ति। सांख्यदार्शनिकाः पुरुषं मन्वते। वेदान्तिनः सृष्टेः मूलकारणं ब्रह्म प्रतिपादयन्ति। यथोक्तं शारीरकविमर्शे-

**लौकायतिका लोकं शैवाः शिवतत्त्वमिच्छयैव विश्वसृजम् ।**
**भागवताः सप्रकृतिं विष्णुं पश्यन्ति विश्वकर्तारम् ।।**
**वैशेषिकाः प्रजापतिमात्मानं पूरुषं सांख्यः ।**
**अथवेदान्ती पश्यति ब्रह्मैवात्मानमस्य विश्वस्य ।।**
**तद्ब्रह्मणः स्वरूपं विज्ञातुं प्रयतमानेन ।**
**मीमांसासूत्राणां तात्पर्यं भूयसाऽलोच्यम् ।।** (शारीरकविमर्शः, पृ२५४)

सर्वे दार्शनिकाः सृष्टेः मूलकारणं स्वसिद्धान्तानुसारं स्थापयन्ति। अस्मिन् ग्रन्थे विशदेन अयं विषयः विवेचितोऽस्ति।

कार्यक्रमे काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्मविज्ञानसंकायस्य व्याकरणविभागस्य पूर्वविभागाध्यक्षाः प्रो. भगवच्छरणशुक्लवर्याः मुख्यातिथिरूपेण विषयस्य प्रतिष्ठापनं कृतवन्तः। तैरुक्तं यत् वेदान्तदर्शने निर्विशेषः आत्मा सृष्टेः मूलकारणम् अस्ति । दिशया, देशेन (स्थानेन), कालेन, संख्यया यत् अनवच्छेदः असीमः अत्यनपिनद्धः (सर्वथा अवद्धः) बलानां निधिः अखण्डात्मा परमेश्वरः परात्परः चिदात्मा निर्विशेषः । निर्विशेषः सांख्यसिद्धान्तानुसारी पुरुषः नास्ति।

तिरुपतिनगरस्थस्य राष्ट्रीयसंस्कृतविश्वविद्यालयस्य आगमविभागस्य आचार्याः प्रो. टी.वी. राघवाचार्युलुमहोदयाः मुख्यवक्तृरूपेण भाषमाणाः अकथयन् यत् सेश्वरसांख्यदर्शने पुरुषः एव प्रधानतत्त्वम् अस्ति। पुरुषस्य का परिभाषा इतिविषये ग्रन्थकारः कथयति यत् निर्विशेषतत्त्वं यदा मायाबलात् युक्तो भूत्वा मायाबलेन उपाधिना प्रमितो भूत्वा निर्गुणं सन्नयं चिदात्मा मायाकारणेन सीमाभावम् अधिगच्छति। एतादृशः निर्विशेषः पुरुषः कथ्यते। अयं पुरुषः महेश्वरः ईश्वरः जीवश्चेति।

असमप्रान्तस्य कुमाभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयस्य न्यायविभागस्य विभागाध्यक्षः राजीवलोचनशर्म्ममहोदयः वक्तृरूपेण विषयस्य उपस्थापनम् अकरोत् । तेन उक्तं यत् सेश्वरसांख्यदर्शने ईश्वरः पुरुषः। स एव अव्ययः।

हिमाचलप्रदेशप्रान्तस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य वेदव्यासपरिसरस्य अद्वैतवेदान्तविभागस्य सहायकाचार्यः डॉ.रघु. बी. राजू. महोदयः वक्तृरूपेण विषयोद्घाटनं कुर्वन् अकथयत् यत् वेदान्तदर्शने जीवात्मा एव पुरुषः। अयं जीवात्मा विभुः एकः। पुनः अग्रे ग्रन्थकारः प्रतिपादयति यत् पुरुषः द्विधा ईश्वरो जीवश्चेति। पुनः जीवोऽपि द्विधा प्रत्यगात्मा शारीरकात्मा चेति ।

जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृत-प्राच्यविद्याध्ययनसंस्थानस्य आचार्याः तथा च श्रीशंकरशिक्षायतनस्य समन्वयकाः प्रो.सन्तोषकुमारशुक्लवर्याः कार्यक्रमस्य अध्यक्षाः आसन्। तै कथितं यत् पण्डितओझामहोदयाः नवीनदृष्ट्या वेदान्तविषयस्य उपस्थापनं कृतवान् । सृष्टेः मूलकारणं तु एक एव परन्तु तत्कारणं सर्वेऽपि दार्शनिकाः न स्वीकुर्वन्ति। केचन शिवतत्त्वं, केचन पुरुषं प्रकृतिं च, केचन देह एव आत्मा। अनेन प्रकारेण शास्त्रे वैविध्यं श्रूयते। तस्य समाधानं वैदिकविज्ञानदृष्ट्या ग्रन्थकाराः ओझावर्याः प्रतिपादयन्ति।

कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन समापनं च वैदिकशान्तिपाठेन जातम्। श्रीशंकरशिक्षायतन-वैदिक-शोध-संस्थानस्य शोधाधिकारी डॉ.लक्ष्मीकान्तविमलः संगोष्ठ्याः सञ्चालनं कृतवान्। कार्यक्रमस्यान्ते श्रीशंकरशिक्षायतन-वैदिक-शोध-संस्थानस्य शोधाधिकारिणा डॉ. मणिशंकरद्विवेदिना समेषान् प्रति धन्यवादज्ञापनं कृतम्। देशस्य विविधेभ्यः विश्वविद्यालयेभ्यः महाविद्यालयेभ्यः अन्यशैक्षणिकसंस्थानेभ्यः शताधिकाः विद्वांसः शोधच्छात्राः वैदिकविज्ञानस्य अध्येतारः स्वकीयेन सहभागित्वेन इमां संगोष्ठीं सफलीचक्रुः।

प्रथमपुटस्य शेषभागः

## कविकुलगुरु कालिदास संस्कृत....

इत्येताभिः सामग्रीभिः सम्मानं विहितम् । मुख्यातिथिः प्रो. रमेश भारद्वाजः कथितवान् यत् विभिन्न भाषाणां विभिन्न ग्रंथेभ्यः कृतैः पुरातात्विक अध्ययनैः ये प्राप्यन्ते ते रसायन विज्ञानं, जैव प्रौद्योगिकी, भौतिकी इव विभिन्न आधुनिक विषयाः अस्माभिः अंगीकरणीयाः। नेपाल विश्वविद्यालयः कविकुलगुरु कालिदास संस्कृत विश्वविद्यालयस्य छात्राणां संकायानां च स्वागतं करिष्यति। अध्यक्षीय भाषणे कुलपतिना हरेराम त्रिपाठिना कथितं कविकुलगुरु कालिदास संस्कृत विश्वविद्यालयः स्व स्थापना समयादेव एक बहु-संकाय विश्वविद्यालयः अवर्तत। वयं छात्रान् विभिन्न आधुनिक विषयेषु यथा होटल प्रबंधन, इंटीरियर, डिजाइन इत्येषु प्रशिक्षितान् करिष्यामः। अस्मत्सकाशे पूर्वतः आईकेएस-आधारित पाठ्यक्रमाः सन्ति । महाराष्ट्र सर्वकारः कविकुलगुरु कालिदास संस्कृत विश्वविद्यालयाय विभिन्न आईकेएस-आधारित कार्यक्रमान् निर्मातुं विभिन्न विश्वविद्यालयेषु संस्थानेषु च आरब्धुं निर्दिष्टवान्।

सम्मेलनसमन्वयकः प्रो पराग जोशी कार्यक्रमं संचालितवान् । कविकुलगुरु कालिदास संस्कृत विश्वविद्यालयस्य कुलसचिवः प्रो कृष्ण कुमार पांडे धन्यवाद ज्ञापनम् अकरोत्। सम्मेलने 135 प्रतिभागिनो भागं गृहीतवन्तः । 65 तः अधिक शोधकर्तारो, विद्वांसः, संकाय सदस्याश्च सम्मेलने विभिन्न सत्रेषु शोधपत्राणि प्रस्तुतवन्तः । प्रो. कविता होले, डॉ. दिनेश रसालः, प्रो कृष्णकुमार पांडे, प्रोफेसर हरेकृष्ण अगस्ती पेपर सत्र अध्यक्षतां कृतवान् । प्रो. पराग जोशी, प्रो. कलापिनी अगस्ती, उपरोक्तस्क्ष अन्ताराष्ट्रिय सम्मेलनस्य समन्वयकौ आस्ताम् । अन्तराष्ट्रिय सम्मेलनस्य शुभारम्भे शास्त्रविद्यागुरुकुलस्य प्राध्यापकौ डॉ अमित भार्गवः निशान्त मिश्रा च जातवेदसी यज्ञशालायाः विष्णुयागम् आयोजितवन्तौ।

प्रथमपुटस्य शेषभागः

## भारतीय संस्कृतेः समावेशेन....

समस्तजनानां सहभागितायै संकल्पः कारितः । भारतीय संस्कृतेः संवाहकः प्रो.महावीर अग्रवालः अध्यक्षीय उद्बोधनस्य क्रमे उपस्थित प्रतिभागिभ्यः वाल्मीकि जयंती एवं शरद पूर्णिमायाः वर्धापनानि दत्वा कथितवान् यत् भारतवर्षे सदैव चिर स्थायी चिन्तनं प्रति बलं दत्तम्। अस्मद् आदर्शः,मूल्यं, चिन्तनं च एतावत् श्रेष्ठं यत् येन नवजीवनमपि प्राप्तुं शक्यते। शोध संकायाध्यक्षः डॉ. मनोज कुमार पटैरिया कथितवान् यत् युवभिः जीवने उत्कर्ष प्राप्तये नियततया अभ्यासः,सम्यक् ज्ञानं, वैज्ञानिक एवं तकनीकी स्वभावः, निरंतरं नवीनचिन्तनं च विकसितं कर्तुं बलं दत्तम् । संकायाध्यक्ष-शिक्षणं प्रो. वी.के. कटियारः समग्र स्वास्थ्य प्राप्तये विभिन्न उपागमैः सह श्वसनस्य जैव यांत्रिकीम् अवबोधितवान्। अवसरेस्मिन् कर्करोग चिकित्सकः सर्जन डॉ.अर्पित बंसलः सततं विकास हेतवे विभिन्न उपायानां चर्चा कृता। एवं च पर्यावरण संरक्षणं प्रति विद्यार्थिनः जागरुकान् अकरोत् । पतंजलिविश्वविद्यालयस्य पक्षी वैज्ञानिक डॉ. रोमेश कुमार शर्मा जीवानाम् आवास-विकासं प्रति जलवायु परिवर्तन प्रभाव विषये विस्तारेण प्रकाशं क्षिप्तवान् ।सम्मेलनेस्मिन् अतिथिः वक्तृ रूपेण स्वामी राज विभू, डॉ. उप्पिलिअपन गोपालनः,ईष्णा अग्रवालः, सुश्री दीपशिखा यदुगिरिः च स्वेन उद्बोधनेन प्रतिभागिनां ज्ञानवर्द्धनम् अकरोत् । कार्यक्रम समन्वयनं 'सी. फॉर यू.इनोवेशन' श्री प्रणवः एवं च विश्वविद्यालय छात्र कल्याण संकायाध्यक्षः डॉ.बिपिन दूबे कृतवान् । योग विज्ञान विभागस्य शोधार्थी हिमांशी एवं प्रभु नारायणश्च कार्यक्रमं सफलतया संचालनं कृतवान। सम्मेलने शोधार्थिनः स्नातक-परास्नातकस्य विद्यार्थिनः उत्साहपूर्वकं प्रतिभागं कृतवन्तः।

प्रथमपुटस्य शेषभागः

## भारतीय ज्ञान-परम्पराणां संवाहकता....

सर्वकारस्य विशिष्टातिथिरुपेण उपस्थिताः । प्रो सेनापतिः कथितवान् यत् संस्कृत विश्वस्य मुखमस्ति यत् यस्मिन् अस्य महनीयभूमिका । प्रो जड्डीपालः कथितवान् अस्मिन् स्थापना दिवसे उपस्थाय अहम् आत्मानमेव गौरवान्वितम् अनुभवामि । यतः मह्यं विशिष्टसंस्थासु कार्यं कर्तुम् अवसरः लब्धः। श्री पौलः कथितवान् यत् विश्वविद्यालयस्य अगरतला परिसरात् अहम् अवगतः अस्मि। विश्वविद्यालयः संस्कृत भाषायाः प्रचारे प्रभावजन्यतया कार्यं करोति। अत्र मम उपस्थितिः सौभाग्यस्य विषयः। विश्वविद्यालय मुख्यालयतः प्रकाशिता यूजीसी केयर लिस्टेड त्रैमासिक अन्तर्राष्ट्रीय शोध पत्रिका संस्कृतविमर्शः, संस्कृतवार्तायाः अपि विमोचनं जातम् । तत् अतिरिच्य महाभारतस्य शान्ति पर्व आधृत्य राज धर्म राष्ट्र धर्म परक भीष्मगीता (श्रीरंगहरिः, व्याख्याकारः) बुद्धस्य जीवने लिखितस्य नाटकस्य धर्मचक्रप्रवर्तनम् ( आचार्य वसंत कुमार भट्ट) इत्यस्य अपि विमोचन जातम्।

मंच संचालनं तथा च धन्यवाद ज्ञापनं क्रमशः पवन व्यास एसोसिएट प्रो., डॉ. रत्न मोहन झा , निदेशक, मुक्त स्वाध्याय पीठम्। प्रो पवन कुमारः, परीक्षा नियन्त्रकः अतिथीनां वाचिक स्वागतं विहितम् ।

उल्लेखनीयं यत् अस्मात् वर्षात् कें. सं. विश्वविद्यालयस्य समस्त परिसरेभ्यः कुलपति पुरस्कार योजनायाः अन्तर्गतं शैक्षणिक तथा शैक्षणिकेतर अधिकारिभ्यः कर्मचारिभ्यः पुरस्कार योजना निर्मिता । अद्य एते पुरस्काराः अपि घोषिता ।


## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**



# सम्पादकीयम्

सम्मान्या: सुरभारतीसमुपासका:!

सादरं नमोनम:।

दीपोत्सवस्य शुभकामना:। दीपावली इति पदं संस्कृतस्य द्वयो:शब्दयो: मेलनेन व्युत्पन्नम्। तौ च शब्दौ दीप: आवली एतन्नाम दीपानां शृङ्खला। दीपक: स्कंदपुराणे सूर्यस्य प्रतिनिधित्व कारकं मान्यते। येन पूर्णोऽपि विश्व: प्रकाशमान:। दीपावली अंधकारे प्रकाशस्य, अन्याये न्यायस्य दुष्कृत्ये सुकृतस्य विजयप्रतीक:। अवसरेऽस्मिन् प्रकाशस्य, धनस्य सौन्दर्यस्य च देवी लक्ष्मी: पूज्यते।

दीपावलीपर्व पुरुषार्थस्य पर्व विद्यते । अपि च एष: आत्म साक्षात्कारस्य पर्व । येन मानव: स्वीयसुषुप्त चेतनां जागरित्वा स्व जीवनस्य उत्थानं करोति। दीपावली अस्मद् आभामंडलं शोधयित्वा पर्यावरणं प्रति जागरूकताया: संदेशमपि ददाति। अथ च वस्तुत: दीपावलीपर्व मर्यादा, सत्यं, कर्म , सद्भावना इत्येषां पर्व । यस्य सूत्रवाक्यं 'तमसो मा ज्योतिर्गमय' तन्नाम अंधकारात् प्रकाशं प्रति गमनम्। अनेन अस्मज्जीवने परिवर्तनस्य उल्लासस्य च संचार: भवेत्। अस्माकं धार्मिक मान्यतानाम् अनुसारम् अस्मिन् दिने भगवान् श्रीराम: मात्रा सीतया भ्रात्रा लक्ष्मणेन सह 14 वर्षीयं वनवासम् अतीत्य अयोध्याम् आगच्छत्। तस्यामेव प्रसन्नतायाम् अयोध्या वासिभि: दीपं प्रज्वाल्य स्वागतं विहितम्। तदारभ्य दीपानाम् उत्सव: दीपावली मन्यते। यो हि कार्तिक मासीयायाम् अमावस्यायां समाचर्यतेस वर्तमाने दीपावली इतोऽपि महत्वपूर्णा प्रासंगिका च यत: शतश:वर्षेभ्य: प्रतीक्षितं अयोध्यायां भगवतो रामस्य विशालं मंदिरं निर्माय सज्जम् । यस्य महत्वं विश्व स्तरीयम्। अंते वयं समस्त पाठकेभ्य: देशवासिभ्यश्च पुन: दीपावल्या: शुभकामना: समर्पयाम:। भगवान् राम: सर्वेषां जीवनं सुखमयं शांतिमयं च कुर्यात्।

भवदीया

सम्पादिका

## ॥ वेद वाणी ॥

'व्युषा आवो दिविजा ऋतेनाविष्कृण्वाना महिमानमागात् ।
अप द्रुहस्तम आवरजुष्टमङ्गिरस्तमा पथ्या अजीग: ।।
महे नो अद्य सुविताय बोध्युषो महे सौभगाय प्र यन्धि ।
चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युम् ।।
सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रै: ।
रुजद्दृळ्हानि दददुस्रियाणां प्रति गाव उषसं वावशन्त ।।'

'Usha, the heavenly Dawn, rises on the horizon. She spreads magnificent effulgence of hers all around. She destroys our foes and dispels the odious darkness. She illuminates the path of wisdom to be trodden by men.""May You awake, Goddess Usha for our sake. May You confer upon us well-being and progress. Bestow on us the best of riches and reputation. As the divine benefactress of humanity, grant us ample food and the best of progeny that enhances our fame.""She is true with the truthful, great with the great and venerable with the venerable. The divine Usha, in the company with other deities, dispels darkness. She lights up pastures for the cattle. All living beings, especially cattle, eagerly long for the dawn.'

The Rig Veda 7.75.1/2/7

'प्र मे पन्था देवयाना अदृश्रन्नमर्धन्तो वसुभिरिष्कृतास: ।
अभूदु केतुरुषस: पुरस्तात्प्रतीच्यागादधि हर्म्येभ्य: ।।
त इद्देवानां सधमाद आसन्नृतावान: कवय: पूर्व्यास: ।
गूळ्हं ज्योति: पितरो अन्वविन्दन्सत्यमन्त्रा अजनयन्नुषासम् ।।
एषा नेत्री राधस: सूनृतानामुषा उच्छन्ती रिभ्यते वसिष्ठै: ।
दीर्घश्रुतं रयिमस्मे दधाना यूयं पात स्वस्तिभि: सदा न: ।।'

'With the aid of effulgent Dawn, I could see the peaceful and radiant path leading to gods. I could clearly see the resplendent flag of light of Ushas (Dawn) fluttering in the East. Ushas is shining brilliantly over several lofty buildings in the East.""Our forefathers, the ancient sages, practised truth. Their sacred words became real in life. Like a father to his child, they taught and directed people on exemplary conduct. They sat alongside gods and enjoyed drinking of the nectarine Soma juice. They had seen the hidden light of Sun and declared the breaking of Dawn to people ""The Dawn is always so magnificent that it inspires poets and Vasishthas who sing hymns in praise of Ushas, to speak auspicious words. She dispels darkness and radiates light everywhere. She confers on us much admired and bounteous wealth. May Goddess Ushas always protect us with the greatest of means at Her command. '

The Rig Veda 7.76.2/4/7

'विश्वं प्रतीची सप्रथा उदस्थाद्रुशद्वासो बिभ्रती शुक्रमश्वैत् ।
हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेत्र्यह्नामरोचि।।
अन्तिवामा दूरे अमित्रमुच्छोर्वी गव्यूतिमभयं कृधी न: ।
यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि ।।

'The most famed Usha, the Dawn, has risen in the East. Robed in spotlessly clean and bright vesture, she advances far and wide. The effulgent Usha, shining in golden hue, looks after cows like a mother. She commences the day and acts as a guide to people.""O! Goddess Usha! You bring riches near us and keep the enemies away from us. Make this vast land free from peril and remove those who hate us.Pour wealth on us, especially those who always sing Your praises.'

The Rig Veda 7.76.2/4/7

संकलन : एस.वासुदेव राव:

# भारतीयोऽस्म्यहम्

## (समीक्षा)

-हरिदत्तशर्मा,
सहायकाचार्य:,
संस्कृतविभाग: देवनागरी-महाविद्यालय: गुलावठी
बुलन्दशहर उत्तरप्रदेश:

**भारतीयोऽस्म्यहम्** नामेदं काव्यं शतककाव्यं विद्यते। अस्य काव्यस्य प्रणेता राष्ट्रकाव्यपुरुष: कीर्त्तिशेष: सदा स्मरणीय: पद्मश्रीसमलङ्कृतो रमाकान्तशुक्लहाभागोऽस्ति। काव्यमिदं राष्ट्रियचेतनया युक्तत्वाद् राष्ट्रियकाव्यमस्ति। राष्ट्रिय चेतनायां राष्ट्रस्य अस्मिताया: रक्षा, राष्ट्रस्य गौरवगानम्, राष्ट्रस्य परिवेश:, राष्ट्रस्य उन्मेष: एवं च राष्ट्रं प्रति तदीयनागरिकाणां समग्र-चिन्तनम् अनुभूतिश्च समाहितं वर्तते। शुक्लमहाभागेन रचितेऽस्मिन् काव्ये राष्ट्रियचेतनाया: सर्वेऽपि अंशा: समाहितास्सन्ति अत: काव्यमिदं निश्चयेन राष्ट्रियकाव्यश्रेणीं बिभर्त्ति।

संस्कृत-वाङ्मये राष्ट्र-शब्दस्य प्राचीनोल्लेख: वैदिक-साहित्ये उपलभ्यते। अथर्ववेदे ऋषि: कथयति यत् आत्मज्ञानिन: ऋषय: विश्वकल्याणार्थं सृष्टे: प्रारम्भ एव दीक्षां जगृहु: तपश्च चक्रिरे। तस्मादेव राष्ट्रनिर्माणं जातम्। तस्मादेव राष्ट्रियं बलम् ओजश्च प्रकटितं बभूव। अत: समस्तै: बुधजनै: अस्य राष्ट्रस्य सनमनं सेवा कर्तव्या।

**भद्रमिच्छन्त ऋषय: स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे।**
**ततो राष्ट्रं बलमोजश्च जातम् तदस्मै देवा उपसंनमन्तु ।।**

अथर्ववेद 19/41/1

संस्कृतवाङ्मये अनेकत्र राष्ट्रचिन्तनं सगौरवं कृतं दृश्यते। वेदेषु पुराणेषु रामायणादिमहाकाव्येषु च भारतवर्षस्य अनेकरूपै: वर्णनं दरीदृश्यते। यद्यपि भारतराष्ट्रं वेदेषु प्रगीतम् अस्ति, पुराणेषु सुन्दरतया चित्रितम् अस्ति, रामायण-महाभारतादिमहाकाव्येषु चारुतया वर्णितम् अस्ति अपि च अद्यावधि पर्यन्तं नानाभाषाप्रवीणकविवृन्दै: नानारूपै: वर्णितम् अस्ति तथापि संस्कृतसाहित्ये भारतवर्णनपरं तादृशं काव्यं विरचितं न दृश्यते यस्मिन् राष्ट्रदेवताया: सकलं स्वरूपं चित्रितं स्यात्। संस्कृतवाङ्मये लब्धवाग्देवीप्रसादै: कविभि: स्ववाक्पुष्पै: समुचितावसरे भारतं पूजितम् अस्ति। संस्कृतसाहित्ये केचन कवय: कथाप्रवाहप्रसङ्गेषु भारतवर्णनं कृतवन्तोऽपरे महाकाव्यसंसारे संचरणशीला: महाकवय: यथावसरं भारतवर्णनं कृतवन्त:। भारतीयभाषासु अनेकै: कविभि: विद्वद्भिश्च भारतवर्णनमेवोद्देश्यीकृत्य काव्यानि विरचितानि येषु हिन्दीभाषायां राष्ट्रकवे: श्रीमैथिलीशरण गुप्तस्य भारत-भारती संस्कृते च श्रीमहादेवशास्त्रिणां भारत-शतकम् इति काव्यद्वयं राष्ट्रप्रेमिण: पाठकान् नितान्तं सन्तोषयति। विपुलतरे भारतवर्णनसन्दर्भे साहित्ये सत्यपि श्रीमता रमाकान्तशुक्लवर्येण विरचिता: भारतवर्णनपरक-रचना: पाठकेषु अद्भुतां दीप्तिम् आवहन्ति नात्र काचित् संशीति: अतिशयोक्तिर्वा। तदीया: राष्ट्रपरक-रचना: श्रुत्वा सहृदया: श्रोतार: स्वान्ते राष्ट्रभक्तिं धारयन्तीति कीर्तिशेषस्य गुरुवर्यस्य रमाकान्तशुक्लस्य महत् साफल्यम् अस्ति।

वयं जानीम: यत् संस्कृतसाहित्ये यादृशी महती स्तोत्ररचनापरम्परा दृश्यते तादृशी राष्ट्रदेवतारचनापरम्परा न दृश्यते परन्तु भारतीयताया: पोषकेण संस्कृतस्य सत्सेवकेन श्रीरमाकान्तशुक्लमहाभागेन विरचितं काव्यजातम् इमां न्यूनतां न्यूनीकरोतीति विभाव्य नितरां प्रसीदति नश्चेत:। अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं भजे इति शङ्कराचार्यप्रणीताद् अच्युताष्टकस्तोत्रात् लब्धप्रेरणो डॉ. शुक्ल: स्रग्विणीं काव्यकलेवरत्वेन निरदीधरत। डॉ. शुक्लस्य रचना: भारतीयसहृदयहृदयेषु नवीनां स्फूर्त्तिं सम्प्रसारयन्ति। तद्रचना: संस्कृतकविषु बालेषु बालासु नारीषु नरेषु वृद्धेषु सिद्धेषु राष्ट्रसङ्गीतलहर्या विलासं कुर्वन्ति जनयन्ति च निर्मलमानन्दममन्दम्। भारतीयोऽस्म्यहम् इत्यस्मिन् राष्ट्रगीतिकाव्ये कविवरेण डॉ. शुक्लवरेण राष्ट्रप्रेम्णो राष्ट्रियताया: भारतीयतायाश्च उत्कटभावना अभिव्यक्ता। अनेन काव्येन कवे: राष्ट्रियभावच्छाया सुस्पष्टतया अवगन्तुं शक्यते। अस्य काव्यस्य प्रकाशनं कविवरेण स्वसम्पादितस्य **अर्वाचीनसंस्कृतम्** इत्याख्यस्य त्रैमासिक-पत्रस्य चतुश्चत्वारिंशत्-पञ्चचत्वारिंशत्तमाब्दीय-प्रथम-द्वितीय-तृतीय-चतुर्थ-संयुक्ताङ्करूपेण प्रकाशिते भारत-स्वातन्त्र्यामृतमहोत्सवविशेषाङ्के **भारतीयोऽस्म्यहम्** इति शीर्षकेण सह कृतम्।

एतत् सम्पूर्णं गीतिकाव्यं स्रग्विणीछन्दसा एव विरचितम् अस्ति। अस्मिन् काव्ये कविवर: भारतराष्ट्रस्य विशेषतानां वर्णनं विधाय भारतीयेषु जनेषु राष्ट्राभिमान-भावनां प्रोद्दीपयितुम् अचेष्टत। कविना अस्मिन् गीतिकाव्ये राष्ट्रवासिषु राष्ट्रप्रेम्णो राष्ट्रियभावनायाश्च चेतनामुद्बोधयितुं भारतीयताया: विविधा: चित्ताकर्षक-विषया: प्रकाशिता: सन्ति। भारतवर्षस्य भारतीयतायाश्च साङ्गोपाङ्गं यादृशं समग्रं युगानुरूपं स्वरूपमिह प्रणेत्रा निरूपितं तादृशमन्यत्र खलु मन्ये सुदुर्लभम् । अस्य काव्यस्य प्रतिपद्यं भारतीयता: वास्तविकी छवि: उपस्थापिता अस्ति। कवि: अस्मिन् काव्ये आत्मानं सर्वत: प्राक् सर्वत: परं च भारतीयम् एव मन्यते। आत्मानं भारतीयं मन्यमान: कवि: भारतस्य भारतीयताश्चेति द्वयस्य अत्यन्तं सुन्दरतया अत्यन्तं सरलभाषया च वर्णनं करोति। वस्तुत: काव्यमिदं भारतीयेषु भारतीयचेतनाया: संवर्धनाय प्रभवति। सर्वत: प्राक् परं भारतीयोऽस्म्यहम् इति अस्य काव्यस्य प्रधान-सन्देशो वर्तते।

कोऽस्मीति इति प्रश्ने कृते कवे: उत्तरमेकमेव तच्चास्ति सर्वत: प्राक् परं भारतीयोऽस्म्यहम् भारतीयोऽस्म्यहमिति।

**संस्तवो मे समे: श्रूयतां कोऽस्म्यहं**
**भारतीयोऽस्म्यहं भारतीयोऽस्म्यहं ।**
**योऽस्म्यहं सोऽस्म्यहं सर्वत: प्राक् परं**
**भारतीयोऽस्म्यहं भारतीयोऽस्म्यहं ।।1।।**

संसारे अनेके सम्बन्धा: सन्ति। कवे: कृते श्रेष्ठ: सम्बन्ध: केवलं भारतीयताया: अस्ति इति अनेन काव्येन वयम् अनुभवाम:। कवे: कथनम् अस्ति यत् मनुष्य: ब्रह्मसम्बन्धात् जीवभूतो वर्तते, भूमिसम्बन्धात् भूमिसुतो वर्तते राष्ट्रसम्बन्धात् भारते जन्महेतो: भारते निवासकारणाद् वा कवि: केवलं भारतीयोऽस्ति-

**ब्रह्मसम्बन्धतो जीवभूतोऽस्म्यहम्**
**भूमिसम्बन्धतस्तत्सुतो मानव: ।**
**राष्ट्रसम्बन्धतो भारते जन्मभाग्**
**भारते वा वसन् भारतीयोऽस्म्यहम्।।2।।**

अनेकतायाम् एकता भारतदेशस्य महती विशेषता वर्तते। भारते अनेके धर्मा: सन्ति अनेका भाषा: सन्ति बहू पर्वाणि च समाचर्यन्ते। अत्र वेश-भूषा- अशन-धर्म-मनोरञ्जन-क्रीडा-संस्कारादिषु वैविध्ये सत्यपि आन्तरिकी एकता दृश्यते। भारतीयताया: एषा महती विशेषता काव्यप्रणेत्रा अत्र काव्ये अनुमोदिता। कवे: कथनमस्ति यद् वेश-भूषादिवैविध्ये सत्यपि असौ राष्ट्रसम्बन्धात् अभिन्नो भारतीयोऽस्ति-

**वेशभूषाशनोपासनापद्धति-**
**क्रीडनामोदसंस्कारवृत्त्यादिषु ।**
**अस्मि भिन्न: परं राष्ट्रसम्बन्धतोऽ**
**भिन्न एवास्म्यहं, भारतीयोऽस्म्यहम्।।3।।**

भारतीयता-वर्णनक्रमे कविना भारतस्य भौगोलिकस्थिते: वर्णनमपि कृतं यत्तु द्रष्टव्यमस्ति । अत्र कथितं यत् समुद्रस्य उत्तरं हिमालयस्य च दक्षिणं यत् शोभते तन्नाम भारतराष्ट्रमिति-

**उत्तरं यत्समुद्रस्य संशोभते**
**दक्षिणं यद्धिमाद्रेस्तथा राजते।**
**भारतं वर्षमस्मज्जनिक्ष्मास्ति तद्,**
**भारतीयोऽस्म्यहं भारतीयोऽस्म्यहम्।।5।।**

अस्मिन् काव्ये कविना भारतीयताया: अनेका विशिष्टता: वर्णितास्सन्ति। भारतस्य भारतीयतायाश्च विशिष्टतानामुल्लेखक्रमे कविवर: औपनिषदं तत्त्वम् अस्माकं पुरत: निदधाति । असौ कथयति यद् भारतदेश: सर्वभूतेषु विश्वेश्वरं पश्यति, कर्म कुर्वन् शतं वर्षाणि जीवति अपि च ज्ञान-भक्ती समाश्रित्य शान्ति लभते-

**सर्वभूतेषु पश्यामि विश्वेश्वरं**
**कर्म कुर्वन् शताब्दञ्च जीवाम्यहम् ।**
**ज्ञान-भक्ती समाश्रित्य शान्तिं लभे**
**भारतीयोऽस्म्यहं भारतीयोऽस्म्यहम्।।7।।**

कोऽपि भारतीय: भारते जन्म लब्ध्वापि विश्वमेककुटुम्बरूपेणैव पश्यति, अखिलविश्वस्य कल्याणम् इच्छति तथा च विश्व-रक्षां विदधातीति भारतीयताया: महान् भाव: कविना अत्र प्रकटित:-

**भारते जन्म लब्ध्वापि विश्वं भ्रमन्**
**विश्वमेकं कुटुम्बकञ्च पश्यन् मुदा।**
**विश्वकल्याणकामी जगद्रक्षको**
**भारतीयोऽस्म्यहं भारतीयोऽस्म्यहम्।।10।।**

राष्ट्रकवे: श्रीशुक्लमहाभागस्य कृते भारतमेव वर्ण-धर्म-जातिरूपेण वर्तते-

**भारतं वर्ण आस्ते मदीय: शुभ:**
**भारतं जातिरास्ते मदीया शुभा ।**
**भारतं धर्म आस्ते मदीयो ध्रुवो**
**भारतीयोऽस्म्यहं भारतीयोऽस्म्यहम्।।13।।**

हिन्दु-मुस्लिमादिषु कवे: रुचि: आग्रहो वा न विद्यते प्रत्युत तदीया रुचिस्तु भारतराष्ट्रं सेवमाने जने विद्यते सममेव भारतस्य अहितं कुर्वते जनाय तस्य घृणा वर्तते इति महान् भावोऽस्मिन् काव्ये कविना सुन्दरतया प्रकटित:-

**हिन्दुमुस्लिम् पदे नो मदीयाग्रहो**
**भारतं सेवमाने जने मे रुचि: ।**
**भारतीयाहितं कुर्वते मे घृणा**
**भारतीयोऽस्म्यहं भारतीयोऽस्म्यहम् ।।13।।**

शेषभाग:पंचमपुटे

चतुर्थपुटस्य शेषभागः

## भारतीयोऽस्म्यहम्

भारते निवासं कुर्वन् अथवा लब्धजन्मा अथवा निजकर्मभिः भारतं पूजयन् कोऽपि मनुष्यः कवये डॉ. शुक्लवर्याय वन्दनीयो वर्तते-

**भारते लब्धजन्माऽथवा वासकृद्**
**भारतं पूजयन् देववत्कर्मभिः।**
**योऽपि कोऽप्यस्तु मे वन्दनीयस्सदा**
**भारतीयोऽस्म्यहं भारतीयोऽस्म्यहम्।।17।।**

अनेन काव्येन स्पष्टं भवति यत् काव्यप्रणेतुः डॉ. शुक्लस्य भारतस्य विविधचिन्तकेषु शङ्कराचार्यप्रभृतिषु समन्वयात्मिका आस्था वर्तत इति-

**शङ्कराचार्य आसेऽथ रामानुजः**
**स्वामिवर्यो दयानन्द आसेऽप्यहम्।**
**श्रीविवेकोऽरविन्दो रवीन्द्रोऽस्म्यहं**
**भारतीयोऽस्म्यहं भारतीयोऽस्म्यहम्।।21।।**

भारतीयतायाः वर्णनक्रमे भारतस्य महापुरुषाणां नामोल्लेखं विधाय तान् प्रति सश्रद्धं कविवरेण महान् आदरः प्रकटितः। तत्तु काव्येऽस्मिन् एकविंशपद्याद् आरभ्य द्वात्रिंशं पद्यं यावत् द्रष्टव्यम् अस्ति। महतां व्यक्तित्वानामुल्लेखं विधाय कविः भारतस्य प्रायः सर्वाणि राज्यान्यपि सादरं स्मरति। अनेन कवेः भारतं प्रति भारतस्य जनतां प्रति भारतस्य स्थलानि च प्रति महान् सम्मानः प्रकटितो भवति।

कवेः आकांक्षा अस्ति यत् भारते निवसन्तः समेऽपि जनाः शिक्षकाः सैनिकाः नैगमाः कार्मिकाः शासकाः कर्षकाः इत्यादयः सगर्वं सहर्षं एकस्वरेण वदेयुः यत्ते सर्वेऽपि भारतीयाः सन्तीति।

कविः आत्मानं गायकादिषु ठाकुर यादवप्रभृतिजातिषु ध निकेषु निर्धनेषु आस्तिकेषु नास्तिकेषु च केवलं भारतीयत्वेनैव अनुभवति-

**गायको नर्तको वादकः क्रीडकः**
**पण्डितो मौलवी ग्रन्थिकः पादरी ।**
**राजनेताऽभिनेतास्मि यः कोऽप्यहं**
**भारतीयोऽस्म्यहं, भारतीयोऽस्म्यहम्।।51।।**
**ठाकुरो यादवो गुर्जरो जाटवो**
**गौत्तमो मौर्यवाल्मीकिवंशोद्भवः ।**
**निर्धनः सद्धनो नास्तिकश्चास्तिकः**
**सन्नरो मूलतो भारतीयोऽस्म्यहम्।।52।।**

कवेः कृते भारतं राष्ट्रं परं दैवतमस्ति (पद्यम्54), भारतीयं ध्वजं भारतीयं यशः भारतीयाः सीमाश्च रक्षितुं कविः स्वीयप्राणान् अपि प्रस्तोतुं तत्परो दृश्यते (पद्यम् 55), कविः भारते तादृशं विधिम् इच्छति येन सत्कर्मनिष्ठावन्तो मनुष्याः निर्भयाः स्युः दुष्कृतिनश्च शीघ्रं दण्डिताः भवेयुः तथा च समस्ताः प्रजाः निर्भयाः स्युरिति-

**ईदृशं कामयेऽहं विधिं भारते**
**येन सत्कर्मनिष्ठाः समे स्युर्ध्रुवम्।**
**दुष्कृतिर्दण्डनीयाविलम्बं भवेत्**
**स्युः प्रजा निर्भया भारतीयोऽस्म्यहम्।।58।।**

जाति-धर्म-क्षेत्र-भाषा-सम्प्रदायाश्रितो द्वेषः देशे क्वापि न प्रसरेत, सर्वे समानाधिकारैर्युताः स्युः, यथाकालं वृष्टिः भवेत्, रोगिणां विना विलम्बं चिकित्सा भवेत्, भारतस्य चतुर्दिग् विकासो भवेत, राजनीतौ सच्चरित्राणां पुरुषाणां प्रवेशो भवेत् इत्यादयः अनेकाः कवेः कामनाः सन्ति (पद्यसंख्या-64, 67, 68, 69,-70)।

काव्येऽस्मिन् कविः पुनरेकवारं मनु-पाणिनि- कात्यायन-पतञ्जलि- याज्ञवलक्य-कालिदासाश्वघोषभासप्रभृतिनैकान् महापुरुषान् सादरं स्मरति । तेषु महापुरुषेषु स्वात्मानं पश्यन् भारतीयोऽस्म्यहम् भारतीयोऽस्म्यहम् इति वावद्यते। गङ्गादिपवित्रनदीनां जलैः पाविते भारते जन्म जातमिति आत्मनः सौभाग्यं मन्यते कविः (पद्यम् 106), कविः प्रभुं प्रार्थयते यदसौ मातृभूमैः सुपुत्रो भवेद् न हि कुपुत्रः कदापि (पद्यम् 108)।

एवं तावदिदमेकं काव्यं संग्रहेण भारतभूभागस्य भारतीयतायाश्च निर्मलां छविमुपस्थापयति। राष्ट्रभक्तिसंवर्धकमिदं काव्यं भारतीयेषु भारतं प्रति नवचेतनां प्रोद्दीपयितुं प्रभवतीति मम विश्वासः। अस्य काव्यस्य प्रतिपद्यं भारतदेवतायाः भारतीयास्मितायाश्च श्रेष्ठं स्वरूपं निरूपितमस्ति। अस्य काव्यस्य भाषा स्वल्पसंस्कृतज्ञानामपि हृदयङ्गमा भवितुं प्रभवति। वर्णने नदीप्रवाह इव सहजप्रवाहो दृश्यते। स्रग्विणीछन्दसा परिमण्डितं **भारतीयोऽस्म्यहम्** नामेदं काव्यं सहृदयहृदयमाह्लादयति।

## (बालकविता)



-डॉ. अरविन्दकुमारतिवारी

भव्यं भारतवर्षं वन्दे!
नव्यं भारतवर्षं वन्दे!
गङ्गा-सिन्धु-पवित्रं वन्दे
यमुना- सरयू- मित्रं वन्दे।
दिल्ली- काशी- महितं वन्दे
सङ्गम-पर्वत- कलितं वन्दे।। १ भव्यं '

अभिनव-चिन्तन-निरतं वन्दे
नवनवदर्शन- कलितं वन्दे
राघव- माधव- फलितं वन्दे
मानव-सद्गुण- वलितं वन्दे।। २ भव्यं'

बहुविध- भूषा- खचितं वन्दे
अगणित- भाषा- रचित वन्दे
अतुलित- संस्कृत- हरितं वन्दे
धीर-चरित-गुण- गणितं वन्दे। ३ भव्यं'

मानवता-गुण- लीनं वन्दे
दानवत- गुण- हीनं वन्दे
कालिदास- कवि- पीनं वन्दे
नारी- चरित-नवीनं वन्दे।। ४ नव्यं'

सर्व-धर्म-समभावं वन्दे
सज्जन-कर्म-विभावं वन्दे
काव्य-मर्म-कलनादं वन्दे
मैत्री- नीति- निनादं वन्दे।। ५ भव्यं'

## 'पिपठिषूणां कोशे नूत्नग्रन्थः'

डा. हेच्. आ.र् विश्वासमहोदयेन लिखितस्य 'सङ्गमः' इत्याख्यस्य उपन्यासग्रन्थस्य लोकार्पणं संस्कृतभारत्याः अखिलभारतीयगोष्ठ्यां ह्यः (२९.१०.२०२३) जोधपुरनगरे जातम्।

अस्य पुस्तकस्य प्राक्कथनं केन्द्रियसंस्कृतविश्वविद्यालयस्य कुलपतिना, संस्कृतभारत्याः अ.भा. उपाध्यक्षेण आचार्येण श्रीनिवासवरखेडिमहोदयेन लिखितम् । तच्च सारांशरूपेण अत्र दत्तम् -

'सुदूरयोः द्वयोः संस्कृतिप्रवाहयोः 'संगमः' अत्र कथावस्तु । न नायकः, न वा नायिका । वैवाहिके संगमे निसर्गतः नारीलोकस्य अधिका प्रवृत्तिः, अभिनिवेशः चेति महिलाप्रधानेयं कथा । दक्षिणदेशे कर्णाटकराज्यस्य उत्तरकन्नडजनपदस्य विशिष्टा आहारव्याहारसंस्कृतिः अत्र चित्रिता । तत्र समुद्भूता सामाजिकी काचित् महती समस्या कथं परिहृता, कथं तत्र सुदूरापि उत्तरसंस्कृतिः उपकरोति इति परस्परभावः अत्र वर्णितः।

विभिन्नदेशयोः सुदूरयोः समाजयोः भाषाभेदम्, आचारभेदम्, आहार भेदम्, वातावरणभेदं च अविगणय्य विवाहसम्बन्धे कल्पिते किं जायते? आदौ भीतिः, शनैः विश्वासः, तदनु अनुबन्धः, ततश्च 'संगमः' इति कथा विकसति ।'

अहं पठनम् आरब्धवान् मनोह्लादकाः विचाराः अत्यन्तं सरलभाषया विवृताः सन्ति। तस्मिन् इन्दिराराधिकयोः भागद्वयं विमाने पठितवान् । पठने इतोऽपि प्रेरणां प्रददाति एषः उपन्यासः । सर्वेणापि संस्कृतजनेन पठनीयः ग्रन्थः।




गतांक शेषभागः

## सूर्यपञ्चाशिका

-डॉ. अरविन्दकुमारतिवारी
संस्कृत प्रवक्ता
आदर्शवैदिकविद्यालयइण्टर
-कालेज, नंगला-सिनौली,
बागपत

सानन्दमेहि जनकस्य विलोचनं भोः
सम्पश्य भास्कर! रवे! वद नैजभावम्।
कार्यं कथं भवति शून्यविलोचनस्य
नेत्रं निमील्य सवितर्भ्रम मंस्यसे त्वम्।। ३५
रामः प्रजार्थमिव राजमणिः कलत्रं
राज्यं श्रुतं पदमहो विभवं विशालम्।
हित्वा वनाद्वनमये गतवानदोषो
मोक्षं ददत् पशुखगादितिपुत्रकेभ्यः।। ३६
एकः शिलातलमहो कृतवांस्तु नारीं
एकः करोषि मनुजं तु शिलासमानम्।
भेदः कथं भुवननेत्रप्रकाशदातः!
आदित्य! देव! कथयेः शमयेर्मदिच्छाम्।। ३७
एवं प्रशासनमहं भवतो नृदेव!
ज्ञात्वारविन्द इह भारतवर्षजन्मा।
त्वां प्रार्थये मुहुरये दितिपुत्रशत्रो!
ज्योतिः प्रदेहि जनकाक्षियुगे रवे मे।। ३८
नो दास्यसीति भगवन्! यदि नेत्ररश्मिं
देह्यन्तरक्षियुगलं भव दानशील!
येनास्य जीवनरथश्चलतात् सुखेन
का सन्ततिर्भजति वृद्धजनं न वेत्सि।। ३९
इच्छा तवास्ति नरनेत्र! सहस्ररश्मे!
भर्तः! कुरुष्व दयया+दयया दिनेश!
सेवामहं विरचयन् कवितां करिष्ये
भिक्षुस्तवैव सदनस्थ इतीन! भानो! ४०
संसारसागरजले पतिता मनुष्याः
पारं प्रयातुमचिरं प्रयन्तत एवम्।
एकस्त्वमेव बहुरश्मिगुणं प्रदाय
नेतुं समर्थ इन! मे हृदयं ब्रवीति।। ४१
लीला तवास्ति ललिता कलिता कृशानो
'बन्धो रवेऽंशुधर! कोटिकरालरश्मे!
भानो! दयस्य सवितः! नृपितर्दयालो!
हत्वाऽन्धतां कुरु पितुर्नयनप्रकाशम्।। ४२
किंवादनं दिनमिदं तनयं पिता मां
यावत् कदापि परिपृच्छति नष्टदृष्टिः।
तावत् पतन्ति शतशो+थ शिला विशाला
आदित्य! वक्षसि ममास्य रवे! कुसूनोः।। ४३
संश्रुत्य सूर्य! भगवन्! मम याचनां हे
भानो! भवानविरतं परिशील्य भावम्।
नेत्रं प्रदास्यति रवे! न च दास्यतीति
द्वारं विहाय भवतो नहि गन्तुकामः।। ४४
उत्साहसाहसबलानि सदैव सूर्य!
संसारिणां विचरतां हर नैव भानो!
जीवन्त्वनेकमनुजा हृतनेत्रयुग्माः
स्पर्शाक्षिशक्तिमखिलामतुलामवाप्य।। ४५
जीवन् दिवानिशमिमे हरिभक्तिमन्तो
वृद्धा भवन्तु सबलाः भर शक्तिमेषु।
हे नाथ! सूर्य! बलवन्! जनदीनबन्धो!
त्रायस्व मत्पितृसमान् निखिलान् मनुष्यान्।। ४६
भक्तिं प्रदेहि मयि मानवमित्र! मित्र!
दिव्यां पितुर्हि परिसेवनकर्मनिष्ठाम्।
खिन्नो भवेयमिह नैव पितुर्वचोभि
'भूयान्नवः श्रवण एव रवेऽरविन्दः।। ४७
सर्वे भवन्तु विमुखा मम बान्धवा वा
दृष्ट्वा पितुर्वचनगं कुपिताः प्रसन्नाः।
नाहं भवेयमतिचारपरायणो वा
रक्ष्या रवे! स्वविभया जनकस्य भक्तिः।। ४८
जानामि भास्कर! रवे! जनतान्धनाशिन्!
आदित्य! सूर्य! विधिचक्ररथस्थमेवम्।
यद्वा विधास्यसि सहस्रखरांशुपाणे!
सर्वं सहिष्य इन! खेचर! जीवलोके।। ४९
प्रीत्या रुषा विरचिता त्वरितं विनम्रा
पञ्चाशिका वसतु ते चरणारविन्दे।
ग्राह्यं प्रियं भगवता रविणा मदुक्तं
गृह्णन्ति के शिशुसदुक्तिमये न भानो!! ५०
होराचतुष्टयमये रमणीयकाले
पादान्विते विरचिता रचना नवेयम्।
आदित्यनाथमनसो हरणाय सूर्य-
पञ्चाशिका सुकृतिनां गलमालिका स्यात्।।५१
श्रीश्रावणे+सितमये गुरुवासरे मे
एकादशीशुभतिथौ जनकाक्षिहेतोः।
सृष्टा गिरां सुकृपयाकविना मयेयं
दद्यात् फलं सपदि कामयतेऽरविन्दः।।५२

# स्वर्णलक्ष्मी: स 'तारा'



**पाता लक्ष्मीपतिर्वः**
'ता' पानां ज्योतिरास्तां विमलमनसि ते ज्ञानदीपस्थदैवं
'पा' ता लक्ष्मीपतिर्वः त्रिभुवनजनकः सौख्यसम्पत्प्रदाता।
'व' स्त्वलंकारदात्री मधुरिपुरमणी सज्जनेभ्यः सदैव
'ली' लालोलासलक्ष्मीर्लसतु ललितला लास्यलावण्यलासा॥१॥

प्रणेता©
**प्रो. ताराशंकरशर्मा पाण्डेयः**

**दीपालिलक्ष्मी:**
वन्द्या वामविनायकोपवलिता वाणीविभाविग्रहा
वाणी-वर्ण्यविशेषवर्णविभिदा सौवर्णवर्णार्णवा।
मध्ये मानवमानमोदमुकुरे मोहोन्मनोमन्दिरे
दीपज्योतिरनूपमातिलसिता दीपालिलक्ष्मी: स्थिता॥2॥

**देवलक्ष्मीं तनोतु**
राष्ट्रे राजाधिराजोभिलषति सुवरां स्थायिनीं राजलक्ष्मीं
सद्धर्मो यो गृहस्थः प्रतिपलमचलां वीक्षते गेहलक्ष्मीम्।
रंको हस्ताकरंको विधिवरवदनं याचते भाग्यलक्ष्मीं
दीपानामावलीयं प्रतिगृहममितां देवलक्ष्मीं तनोतु ॥3॥

**स्वर्णलक्ष्मी: स 'तारा'**
राज्ये राराज्यमाना रजति प्रतिफलं रूप्यलक्ष्मी रमेयं
कोषे देदीप्यमाना सरसजलधिभूर्दीप्तमाणिक्यलक्ष्मी: ।
मन्दं मन्दं स्मितेयं मदयति महिजा धान्यलक्ष्मीर्वरासौ
कान्ताभि: काम्यमानाचलचलचरणा स्वर्णलक्ष्मी: स 'तारा'॥4॥

**लक्ष्मीर्विदध्यात्कृपाम्**
तारोमाकमलापतिर्विबुधभा-दीप्तं भवेन्मानसं
धर्माचारभवोज्ज्वलं सहृदयः काव्यत्रिपाठी वरः।
दत्तोदात्तविचारमाधवयुता केदारजोषान्विता
भट्टाचार्यमनोवितोषफलितां लक्ष्मीर्विदध्यात्कृपाम्॥5॥

**शब्ददीपा:**
भावोज्ज्वलतया दीप्ता: शब्ददीपास्तमोहरा:।
रात्रौ शशिनिभा: कान्ता दृष्टा लोकैस्सदाशयै:॥6॥

**भ्रातृपर्व**
धन्वन्तरिर्महालक्ष्मी - गोवर्धनधरस्तथा।
भ्रातृपर्व सदा कुर्यात्सर्वेषां मञ्जुमङ्गलम्॥7॥

**जयेत्प्रेमा**
भ्रातृभग्न्योर्जयेत्प्रेमा दैवीयभावनाधर:।
वर्षं वर्षं भवेत्प्रेमा संस्कारिते सुविष्टपे॥8॥

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित- प्रतिनवबाणभट्ट-पण्डित-श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय-कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं 'स्वर्णलक्ष्मी: स 'तारा'ऽष्टकं' नामकाव्यं सम्पूर्णम्।

# साधुत्वं क्व गतं



-डॉ. जोगेन्द्रकुमार:
एसोसिएट प्रोफेसर
बी.एल.जे.एस.
महाविद्यालय:
तोशाम: (भिवानी)
हरियाणा

अस्वस्था खलु शिष्टतोनवरतं पापं भृशं फुल्लति
नूनञ्च प्रतिभा विनश्यति पुरो भ्रष्टस्य तन्त्रस्य वै।
आटोपश्च विवर्धते प्रतिदिनं गूढा तथा सत्यता
साधुत्वं क्व गतं हि साम्प्रतमहो संदृश्यते न क्वचित्॥

लोके नश्यति बन्धुता परिचयो लोभश्च मूर्ध्नि स्थितो
वार्धक्यञ्च निराश्रयं हि भवति प्रायो युवा दिग्भ्रम:।
निर्लज्जा खलु सन्ततिर्गुरुजना दीनास्तथा सर्वथा
साधुत्वं क्व गतं हि साम्प्रतमहो संदृश्यते न क्वचित्॥

नारीणाञ्च पदे पदे परिभव: संदृश्यते सन्ततं
नित्यं दूष्यति संस्कृतिर्ननु मति: संवर्धते शत्रुता।
लोकेस्मिन् खलु दृश्यते च विकृति: सर्वत्र नो संशय:
साधुत्वं क्व गतं हि साम्प्रतमहो संदृश्यते न क्वचित्॥

लुण्ठ्यन्ते खलु साधवा:प्रतिदिनं हर्षन्ति दुष्टा: ध्रुवं
कन्या नैव सुरक्षिता: क्वचिदपि प्राज्ञास्सदा चिन्तिता:।
पश्यन्त्यत्र सुखं यथा ननु धने सर्वे कुले नो तथा
साधुत्वं क्व गतं हि साम्प्रतमहो संदृश्यते न क्वचित्॥

# ॥भावकुसुमाञ्जलि:॥



-डॉ. निरंजन मिश्र

न गंगा मे शुद्धा नहि रसवती चाद्य यमुना
प्रसन्ना नो मे गौ नहि वनविलासो हितकर:।
न वन्द्या विद्या मे नहि रसवती वा सुजनता
त्वदर्चायां चित्तं कथमिह भवेन्मे गिरिसुते॥1
कुलीना नो नीतिर्नहि सुरविलासे+प्यभिरुचि:
खलानां निर्बन्धा प्रसरति गतिस्ताण्डवविधौ।
तमिस्रा ज्योत्स्नाया धवलपरिधाने स्मितमुखी
सदा लोकप्रीता विलसति कथं स्यात्तव कथा॥2
धनेशो लोके+स्मिन् विलसति तथा वा खलबली
वमन्ती वा हालां नटति नटिनीवाम्बुधिसुता।
सतां धैर्यं वीर्यं यमदशनमध्ये निपतितं
त्वदर्चायां कश्चित्कथमिह भवेन्मे गिरिसुते॥3
त्वदर्चाया व्याजात्प्रचलति शिवे यत्प्रतिपदं
स्वयं त्वं तद्रोद्धुं द्रवतर धरायां स्मितमुखी।
करालीं तां कालीं निजसहचरीमाहर रणे
तदैव त्वत्पूजा जनमनसि भूयात्फलवती॥4
इदानीं त्वत्पादप्रणतिरिह शेषो भवतु मे
न चान्यच्चित्ते मे किमपि हि भवेत्त्वद्विरहितम्।
त्वमेवैका मातर्वस मनसि विश्वम्भररता
सुधासौन्दर्यं ते प्रवहतु सदा मन्नयनयो:॥5
दृष्टं यच्चानुभूतं वा लोकलीलाविलासजम्।
तद्धि त्वामर्पयाम्यद्य वाचा भव शिवप्रदा॥6
हृद्भावग्रथिता माला त्वत्पूजार्थमिहार्पिता।
कण्ठे गृहाण मातर्मामङ्गीकुर्वथवा न वा॥7

# 'शरण्यं मदीयं त्वमेका भवानि!'



- डॉ.शशिकान्त तिवारी 'शशिधर'

न नीतिर्न गीतिर्विधिर्नो धृतिर्वा
गतिर्नो मतिर्नो सुकार्ये रतिर्वा।
न भुक्तिर्न मुक्तिर्न युक्ति: क्वचिन्मे
शरण्यं मदीयं त्वमेका भवानि!॥01॥
न शक्तिर्न दृष्टिर्न शान्तिश्श्रुतिर्वा
न रागो नहि त्यागभावो विशिष्ट:।
मयि विद्यते प्रेमभावोपि नैवं
शरण्यं मदीयं त्वमेका भवानि! ॥02॥
मनश्चञ्चलं हा! मतिश्चञ्चला मे
समस्तेन्द्रियाणीह मे चञ्चलानि।
कथं संस्मरेयं त्वदीयं स्वरूपं
शरण्यं मदीयं त्वमेका भवानि!॥03॥
पदं नो पवित्रं यशो नो पवित्रं
चरित्रं पवित्रं विचार: पवित्र:।
गृहं नो पवित्रं धनं वा पवित्रं
शरण्यं मदीयं त्वमेका भवानि!॥04॥
सुतो वा सुता वा कलत्रञ्च मित्रं
कुटुम्बं गृहं नश्वरं नात्र शङ्का।
नभो भूतलं नश्वरं हा! समस्तं
शरण्यं मदीयं त्वमेका भवानि!॥05॥
न भक्तिं न भावं न पूजादिकं वा
विजानामि नैवं हि धर्मं न कार्यम्।
सुतोहं त्वदीयस्त्वमेवासि माता
शरण्यं मदीयं त्वमेका भवानि!॥06॥
न याचे सुखं नो यशो नो धनं वा
न शक्तिं पदं नैव यानं गुणं वा ।
प्रदेहि प्रियं यन्मनोवाञ्छितं मे
शरण्यं मदीयं त्वमेका भवानि!॥07॥
शशी सच्छरण्यं गतो वर्तते ते
विचारश्च ते रोदयेर्मोदयेर्वा ।
न माता कुमाता भवत्यत्र जाने
शरण्यं मदीयं त्वमेका भवानि!॥ 08॥

# ऊँकारमहिमा



**-जयप्रकाश शर्मा**
साहित्याचार्य
पाण्डुलिपि विशेषज्ञ

श्री गणेशाय नम:
ऊँ कार बिन्दु संयुक्तं नित्यं ध्यायंति योगिन:।
कामदं मोक्षदं चौव, ऊँ काराय नमो नम:॥1॥
सूतपुत्र महाबाहो सर्वशास्त्र विशारद:।
तद् व्रतं ब्रूहित: साधो सर्वार्थायो न सिध्यति॥2॥
साधुपृष्ठं महाभागा: भवद्भिर्लोक मंगलं।
गुह्या गुह्यतरं लोके ब्रवीमि व्रतमुत्तमं॥3॥
तच्छृणाश्र्ं महाभागा: एकाग्र व्रत मानसा:॥
इदं व्रत मया पूर्वं न कस्यापि प्रकाशितम्॥4॥
विष्णोस्वरूपमोंकारं जानीधुं द्विज सप्तमा:॥
ऊँ कारादेव प्रथमं वेदा: सर्व प्रजज्ञिरे॥5॥
उत्तमांगेषु सततं ऊँ कार सर्व प्राणिनां॥
रणत्कारेण वर्तते योग गम्योन चान्यथा॥6॥
तस्य व्रतं महापुण्यं महापातक नाशनम्॥
पुत्र प्रदय पुत्राणां दरिद्राणां धन प्रदम्॥7॥
बन्ध्यापि लभते पुत्रं व्रतस्यास्य प्रभावत:॥
मृतवत्सा च या नारी जीववत् सा प्रजायते॥8॥
केनचादौ व्रतं पूर्वं मर्त्यलोके प्रकाशितं॥
क्रियते च कथं चास्य उद्यापन विधि पुन:॥9॥
एतत्सर्वं सुविस्तार्यं ब्रूहि सूत कृपानिधे
अस्माकं महती श्रद्धा व्रतस्य श्रवणे ध्रुवं॥10॥
ऊँ कारस्य वृतस्यास्यं उत्पत्तिं ब्रह्म वित्तमा:॥
श्रृणुता वहिता संत: कथ्यमानं मया नघा:॥11॥
अक्षरोभि: व्रतं पूर्वं मर्त्यलोके प्रकाशितं॥
तत्सर्वं कथयिष्यामि देवस्त्रीभिर्यथा व्रतं॥12॥
घृताचीमेनकारंभा उर्वशी च तिलोत्तमा॥
एता अक्षर सा श्रेष्ठा मिलित्वा स्वर्गलोकत:॥1॥
परस्परं प्रीति युगे ऊर्णनाभिश्च वानरी॥
य दृष्ट्या च तत्रैव संप्राप्ते भाग्य योग्यत:॥14॥
तद्वताक्षर सा श्रेष्ठा: किमेतत् डोरकं द्वयं॥
कुयोनिं च तयो दृष्टा दयार्द्र कृत मानसा:॥15॥
कस्मिन् मासितिथौ कस्यां कस्मिन् पक्षे कथं पुन:अ
क्रियते व्रतमेतद्धि तत्प्रब्रूतामरांगणा:॥16॥
अक्षरस ऊच भाद्रमासि सिते पक्षे अष्टमां प्रति वत्सरं॥
क्रियते व्रतमस्याभि देंव राजोपदेशत:॥17॥
डोरकं तु विधातव्यं अष्टभि: सूत्र तंतुभि:॥
तस्मिन् सुडोरकेसम्ये कूदातव्या अष्ट ग्रंथयं॥18॥
ऊँ कारस्य व्रतेनैव पूजनं भक्ति: भावत:॥
कर्तव्यं डोरके तत्र सुगन्धै: कुंकुमादिभि:॥19॥
मोष्टीं मुद्रां च चणकं आर्द्रयित्वा जलेन तु॥
अथवा नालिकेरं च रोटकं घृत गुडान्वितं॥20॥
निवेदयित्वा देवाय भक्ति युक्तेन चेतसा॥
नमस्कारं तत: कुर्यात् पुनर्देवं विसर्जयेत्॥21॥
बीजपूर श्री फलाभ्यां सहितैकं सुडोरकं
कस्यै स्त्रियै प्रदातव्यं एकं धार्य स्वमस्तके॥22॥
अष्टसुवंश पात्रेषु निक्षिपेत् श्री फलाष्टकं॥
पुनरन्मनि धातव्यं चूर्णं घृत गुडान्वितं॥23॥
नवमं सुमहत् तत्र स्थापयेद् वंश पात्रकं॥
अलंकारा निवस्त्राणि श्रीफलं बीजपूरकं॥24॥
ऊँ कारस्य च माहात्म्यं सूचि पौराणिकी कथां॥
ब्रह्मणेन वाच्यमानां श्रृणुयात्सु समाहिता ॥25॥
संकल्पयित्वा तत्सर्वं ब्राह्मणेभ्य: प्रदापयेत्॥
सर्वान् कामान वाप्नोति दानेनानेन सुरता॥26॥
एवमुद्यापनं कृत्वा तत उर्द्ध वृतेषु च॥
एकभक्तं प्रकुर्वीत पूजनं न परित्यजेत्॥27॥
युवाभ्यामपि दास्याम ग्रहीतां डोरक द्वयं॥
युवामपि प्रकुरुतां व्रतमेतद उत्तमं॥28॥
तस्मात्पुन: प्रगृह्या तु राजा पत्नी व्रतं शुभं॥
धारये डोरकं भूयो जीवात्पुत्रा भविष्यति॥29॥
तत्स्तया व्रतं सम्यक् कृतं तत्पुण्य योगत:॥
पुत्रावभूज: रुचिरा: धर्मज्ञाश्चिरविन:॥30॥
तत् प्रसिद्धमापन्न मर्त्यलोके प्रकाशितं॥
पठनाच्छ्रवणाच्चस्य सर्वान् कामान वाप्नुयात्॥31॥

# चायदशकम्



डॉ. विपिन कुमार द्विवेदी
पीसीपी इंटर कॉलेज
हुसैनगंज, फतेहपुर

अम्लरसं समुत्पाद्य क्षुधातृषाविनाशकम्।
तुंदिलं च नरं कृत्वा चायं लोके महीयते॥
मधुमेहमहारोगं रक्तचापं विवर्धयद्।
ओजकांतिहरं नित्यं चायमाद्रियते परम्॥
गेहे गेहे नरा वृद्धा बाला युवजनस्त्रिय:।
याचमाना हि सोत्कंठ प्रातश्चायं कुतो मम॥
कार्यालये सुहट्टे वा चत्वरे वा चतुष्पथे।
नरहस्तगते चायं चषके हि विराजते॥
मेलनस्य परं व्याजं समस्याया निराकृति:।
अलंकारस्सभायाश्च चायमेतद् विकाशते॥
विना चायं शिरश्शूलं नराणां हि प्रजायते।
नवोत्साहो विना चायं पलायते नृचेतस:॥
पायं पायं भृशं चायं कायं हि विकृतं परम्।
मुखं कृष्णमहो जातं चायं चित्तं न निंदति॥
पिबेयुर्यदि वृद्धाश्च तर्हि चायं वरं स्मृतम्।
बाला हि युवका: सर्वे सुसेवन्तां क्वचित् क्वचित्॥
विना दुग्धं वरं चायमुच्यते च चिकित्सकै:।
शर्करारहितं चायं बल्यं स्फूर्तिकारकम्॥
उचितमात्रया सेव्यं चायं पानं च भोजनम्॥
अतिमात्रं सदा हेयमुत्तमस्वास्थ्यमिच्छता॥

# पावन-सलिलम्



**-बालमुकुंद दुबे**
(सहायक अध्यापक)
प्राथमिक विद्यालय
पिपरा चतुरी, भलुअनी
,देवरिया( उत्तर प्रदेश)

गंगा-यमुना-नद्यो: सलिलम्।
एतत् सलिलम् ,पावन-सलिलम्॥

अमलम् ,विमलम् ,अतीव मधुरम्।
कुरुते कलखकलमचिरं सुरवम्॥
गंगा-यमुना....

भारतवर्षे ,प्रवहति सततम्।
सिंचति कृषक: ;नाना-शस्यम्॥
गंगा-यमुना....

स्नाने-पाने यस्य महत्त्वम्।
गेहे- गेहे ,भवेत् सलिलम्।
गंगा-यमुना....

अन्ते प्रविशति,सागरख्रमतुलम्।
अनयो: नद्यो: दिव्यम् सलिलम्॥
गंगा-यमुना....

गंगा-यमुना-नद्यो: सलिलम्।
एतत् सलिलम् ,पावन-सलिलम्॥

# ‘देववाणीपरिषदा समायोज्यत षट्त्रिंशः पण्डितराजमहोत्सवः’

२८.१०.२०२३ तमे दिनाङ्के (शरत्पूर्णिमायां विक्रमसंवत् २०८०) दिल्लीस्थया देववाणीपरिषदा षट्त्रिंशः पण्डितराजमहोत्सवः समायोज्यत। कार्यक्रमस्य शुभारम्भः ऋषिराजपाठककृतसामगानेन,




शिवाङ्गीकृतलौकिकमङ्गलाचरणेन चाभूत्। देववाणीपरिषत्प्रबन्धकेन श्रीमता आनन्दवर्धनशुक्लेन स्वागतभाषणं कृतम्। माल्यार्पणेन आगन्तुकानामतिथीनां स्वागतविधेरनन्तरं डॉ. उदयप्रकाशझाः पण्डितराजजगन्नाथविषये स्वविचारान् प्राकटयत्। तदनु राष्ट्रकिङ्करपत्रसम्पादकः श्रीविनोदबब्बरः आचार्यरमाकान्तशुक्लविषये तत्स्मृतिप्रणामपूर्वकं कानिचन संस्मरणानि प्रास्तोत। ऐषमः पण्डितराजसम्मानः संस्कृतसाहित्यकाराय कवये विदुषे समालोचकाय सम्पादकाय अनुवादकाय वेदभाष्यकाराय श्रीमते डॉ. प्रवीणपण्ड्यावर्याय समर्पितः। अस्मिन् सम्मानार्पणक्रमे देववाणीपरिषदध्यक्षेण डॉ. अभिनवशुक्लेन विशिष्टमाल्यार्पणद्वारा, मुख्यातिथिना पण्डितविष्णुकान्तशुक्लेन चोर्णावस्त्रप्रदानेन सम्माननीयविदुषः सत्कारः कृतः। देववाणीपरिषत्संरक्षिकया श्रीमत्या रमादेव्या, परिषदध्यक्षेण डॉ. अभिनवशुक्लेन, परिषत्प्रबन्धकेन च श्रीमता आनन्दवर्धनशुक्लेन सम्माननीयाय विदुषे शास्त्रचिन्तकाय च डॉ. प्रवीणपण्ड्यावर्याय पण्डितराजसम्मानपत्रप्रदानं कृतम्। परिषन्महासचिवेन ऋषिराजपाठकेन श्रीप्रवीणपण्ड्यावर्यविषया प्रशस्तिः पठिता। तदनु श्रीप्रवीणपण्ड्यावर्येण आचार्यरमाकान्तशुक्लवर्याणां तुलना पण्डितराजजगन्नाथेन सह कृता तेषां पाण्डित्यं च प्रख्यापितम्। तेन सप्रमाणम् इदमप्युक्तं यत् पण्डितराजजगन्नाथविषये प्रचलितो लवङ्गीविवाहप्रवादोऽपि मिथ्याऽस्ति। मुख्यातिथिना पण्डितविष्णुकान्तशुक्लेन पण्डितराजजगन्नाथस्य काव्यानि श्रावितानि कार्यक्रमस्य सातत्यविषये च स्वोद्गाराः प्रकटिताः। तदनु च कविसमवायः प्रारब्धः। कविसमवायस्य अध्यक्षाः डॉ. परमानन्दझावर्याः अभूवन्। डॉ. प्रवीणपण्ड्याः, डॉ. दिव्यानन्दझाः, डॉ. ऋषिराजपाठकश्च स्वरचनाः अपठन्। डॉ. ऋषिराजपाठकः पण्डितराजजगन्नाथस्य रचनाः पण्डितस्य स्रग्विणीराजराजस्य रमाकान्तशुक्लस्य च रचनाः अपठीत्। डॉ. परमानन्दझाः च महर्षिवाल्मीकिजयन्तीमुपलक्ष्य वाल्मीकिमुनिं स्तुतवान्। तदनु वरदः शुक्लः, शिवाङ्गी शुक्ला, सुरुचिः शुक्ला च श्लोकपाठमकार्षुः। संस्कृतसंवादसम्पादकः श्रीवेदशर्मा स्वसंस्कृतपत्रकारिताप्रवेशविषये आचार्यरमाकान्तशुक्लप्रेरणाः कारणीभूताः अवर्णयत। परिषदः संरक्षिकया श्रीमत्या रमादेव्या विद्वदागमनार्थं कृतज्ञता ज्ञापिता। परिषदध्यक्षेण डॉ. अभिनवशुक्लेन अध्यक्षीयं वक्तव्यं भाषितम्। ऋषिराजपाठकेन देववाणीपरिषदः अर्वाचीनसंस्कृतपत्रिकायाः परामर्शदातृमण्डले समाविष्टस्य आचार्यसुधीकान्तभारद्वाजस्य दिवङ्गमने देववाणीपरिषत्पक्षतः श्रद्धाञ्जलिरर्पितः। ऋषिराजपाठकेन आचार्यरमाकान्तशुक्लकृतं ‘भाति मे भारतम्’ इति काव्यं गीतम्। परिषदः सहसचिवेन डॉ. योगेशशर्मणा धन्यवादज्ञापनं कृतम्। सञ्चालनञ्च परिषन्महासचिवेन ऋषिराजपाठकेन कृतम्।

# कालिदाससंस्कृतादम्याः नवनियुक्तनिदेशकस्य डॉ. गोविंदगंधेवर्यस्य अभिनंदनम्

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालये देशस्य प्रतिष्ठितस्य कालिदाससंस्कृतादम्याः नवनियुक्तनिदेशकस्य डॉ. श्रीगोविंदगंधेवर्यस्य विश्वविद्यालयस्य माननीयैः कुलपतिवर्यैः आचार्यविजय



कुमारसीजीमहोदयैः अभिनंदनं सम्मानं च विहितम् , विश्वविद्यालयेन प्रकाशितं साहित्यञ्च भेंटरूपेण प्रदत्तम् ।कुलपतिवर्यैः गंधेमहोदयस्य अभिनंदनं कृत्वा उक्तं यत् पाणिनिविश्वविद्यालयः तथा च कालिदाससंस्कृतअकादमी संस्थांद्वय संस्कृतभाषायाः प्रचार-प्रसारस्य एवञ्च संवर्धनस्य कार्यं करोति अग्रेपि परस्परसहयोगेन संस्कृतभाषायाः उन्नयनाय विकासाय च कार्यकर्तुं प्रतिबद्धोस्ति ।अवसरेस्मिन् डॉ. गोविंदगन्धेमहोदयैः विश्वविद्यालयस्य माननीयकुलपतिवर्याणां सम्माननं कृतम् उक्तञ्च पाणिनिसंस्कृतवैदिकविश्व विद्यालयस्य सह्योगेन अकाद्मी सम्पूर्णप्रदेशे संस्कृत-संस्कृत्याः संरक्षणार्थं मिलित्वा कार्यं कर्तुं कृतसङ्कल्पौस्ति। अस्मिन्नवसरे संस्कृतशिक्षणप्रशिक्षणज्ञान विज्ञानसंवर्धनकेंद्रस्य निदेशकः व्याकरणविभागाध्यक्षश्च डॉ. अखिलेशकुमारद्विवेदी ,ज्योतिष विभागाध्यक्षः डॉ. शुभमशर्मा डॉ.अनिलमुवेलः डॉ.अजयराठी तथा विश्वविद्यालयस्य सर्वेपि प्राध्यापकाः उपस्थिताः आसन्।

# संस्कृतक्षेत्रे आजीविकानाम् अपारसम्भावनाः - डॉ. दिनेशः

नई दिल्ली। पीजीडीएवी महाविद्यालये (सांध्य) 18.10.23 तमे दिनाङ्के आजीविका मार्गदर्शन समितिः संस्कृत विभागस्य संस्कृत परिषद् च संयुक्त तत्त्वावधानेन “संस्कृत क्षेत्र में आजीविका के अवसर” इत्येतं विषयम् आधृत्य विशिष्ट व्याख्यानं आयोजितवन्तौ मुख्य वक्ता डॉ. दिनेश यादवः श्री लाल बहादुर शास्त्री केन्द्रीय संस्कृत विश्वविद्यालये शिक्षा विभागीयः सहायकाचार्यः अभाषत यत् कानिचन क्षेत्राणि विहाय प्रायः सर्वकारी सेवासु संस्कृतविद्यार्थी आवेदनं कर्तुं प्रभवति। शिक्षकत्वेन टी.जी.टी, पी.जी.टी. अथ च सैनिकविद्यालयः ,नवोदय विद्यालये सी.आर.पी.एफ.,एयर फोर्स विद्यालय ,के.वी.एस. इत्यत्र बाहुल्येन वृत्तेः अवसराः सन्ति। एम. ए. पश्चात् नेट उत्तीर्य महाविद्यालये विश्वविद्यालये च सहायक आचार्य पदाय आवेदनं भारतीय प्रशासनिक सेवायाम् अवसरः विद्यते, संस्कृतच्छात्रः मनुस्मृतिम् अधीत्य अधिवक्ता भवितुमर्हति। सेनायां सामान्य पदेषु आवेदनं कर्तुं शक्यम्। धर्मगुरुपदे तु केवलं संस्कृत विद्यार्थिने एव अवसरः भवति। कर्मकांड क्षेत्रम्, अनुवादकः, संपादकः, समाचारवाचकः, कथावाचकः, संशोधकः, धर्मशास्त्र-प्रवक्ता, प्रबंधकः, योगशिक्षकः इत्येते बहवः अवसराः समुपलब्धाः । कार्यक्रम प्रारम्भ दीप प्रज्ज्वलनेन सरस्वती वन्दनया च कार्यक्रमः शुभारब्धः। आजीविका मार्गदर्शन समिते संयोजिका प्रो. आशारानी समागतानां स्वागतमकरोत्। संस्कृत परिषदः संयोजकः डॉ.तरुण कुमार दीपः डॉ. दिनेश यादवस्य परिचयं दत्तवान्। सह सयोजक डॉ. कुलदीप सिंहः अतिथीनाम् आतिथ्यम् अकरोत् । संस्कृत विभागस्य प्रभारी डॉ. योगेश शर्मा सर्वेभ्यः धन्यवादं ज्ञापितवान्। कार्यक्रमे डॉ.पलविन्दर कौरः, डॉ.आनन्दः, डॉ. रंकेश डॉ. दीपकः इत्येते गणमान्याः उपस्थिताः । कार्यक्रमस्य संचालनम् ओम एवं तनिष्का गोयलः कुशलता पूर्वकम् अकुरुताम् ।



अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।